Entered
25-6-18
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTHECA INDICA:

৫৩

A

COLLECTION OF ORIENTAL W …षयानुगमो

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

PROVINCIAL MUSEUM LUCKNOW REFERENCE LIBRARY

New Series, No. 1265.

तत्त्वचिन्तामणि दीधिति-विवृति



5740

TATTVACINTĀMANI DIDHITI-VIVRITI

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

Edited By

MAHĀMAHOPĀDHYĀYA KAMAKHYANATHA TARKAVAGISA,

Professor, Sanskrit College.

Volume I. Fasciculus II.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS.
No. 5, Nandakumar Choudhury's 2nd Lane.

AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.

1911.

ntered
-18

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTH

COLLECTION O

AS

BOOKS FOR SALE

HE LIBRARY OF THE

OCIETY OF BENGAL.

, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

Y'S AGENTS, MR. BERNARD QUARITCH,

. NEW BOND STREET, LONDON, W., AND MR. OTTO

ITZ, BOOKSELLER, LEIPZIG, GERMANY.

*...te copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

	Rs.	
Sanskrit Series	1	4
•Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	1	14
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	5	10
*Agni Purāṇa, Fasc. 6–14 @ /10/ each .. Vol. II, Fasc. 1-5 ; Vol. III.		
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 ;	14	6
Fasc. 1–5, Vol. IV, Fasc. 1–8 @ /10/ each	2	0
Aitereya Lochana.	2	8
· Aṇu Bhāṣhya, Fasc. 2–5 @ /10/ each	1	0
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-	3	12
Aṣṭasāhasrikā Prajñāpāramitā. Fasc. 1-6 @ /10/ each	1	4
*Atharvana Upanishad, Fasc 4-5 @ /10/ each	0	10
Atmatattaviveka, Fasc. I. @ /10/ each	3	2
Açvavaidyaka, Fasc. 1–5 @ /10/ each ... Vol. II. Fasc.		
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–7 ;	15	0
1-7 @ 1/ each ..	1	14
Bālam Bhaṭṭī, Vol. I, Fasc. 1–2, Vol 2, Fasc. 1 @ /10/ each	3	12
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-3 @ /10/ each	3	2
*Bhāmatī, Fasc. 4–8 @ /10/ each	4	6
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each	2	0
Baudhyostatrasangraha	2	8
Bṛhaddēvatā Fasc. 1–4 @ /10/ each	3	12
Bṛhaddharma Purāṇa Fasc 1–6 @ /10/ each	3	2
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	1	14
Cri Cantinatha Charita, Fasc. 1-3	1	4
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	8	0
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/ each ... Vol. III,		
Çatapatha Brāhmaṇa, Vol I, Fasc. 1–7, Vol II, Fasc. 1-5,	14	6
Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	3	2
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each ...	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/	8	12
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1--14 @ /10/ each... Vol. III. Part I,		
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1–25 ;	36	14
Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each	2	8
Ditto Vol. 4, Fasc. 7-8. @ 1/4/ each ...	1	4
Ditto Vol. IV, Fasc. 8-9 @ /10/	8	12
Çlockavartika, (English) Fasc. 1- 7 @ 1/4/ each	3	12
*Çrauta Sūtra of Āpastamba, Fasc. 1–17 @ /10/ each ... Vol. II, Fasc. 1–4,		
Ditto Çāṅkhāyana, Vol. I, Fasc. 1–7 ;	10	0
Vol. III, Fasc. 1–4 ; Vol 4. Fasc. 1 @ /10/ each	1	14
Çri Bhāshyam, Fasc 1–3 @ /10/ each ...	1	4
Dāna Kriyā kaumudī, Fasc 1--2 @ /10/ each	4	6
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1–7 @ /10/ each	3	2
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol I @ /10/ each	2	8
Ditto Vol II. Fasc. -2 @ 1/4/ each ...	2	0
Ditto (Appendix) Gobhila Pariśiṣṭa	0	10
Ditto Grihya Sangraha	1	14
Haralata	1	4
Karmapradiph, Fasc. I	4	6
Kāla Viveka, Fasc. 1–7 @ /10/ each	4	8
Kātantra, Fasc. 1–6 @ /12/ each	17	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ 1/4/ each	4	6
*Kūrma Purāṇa, Fasc -9 @ /10/ each ...	3	6
Lalita Vistara, (English) Fasc. 1-3 @ 1/- each	6	14
Madana Pārijāta, Fasc. 1-11 @ /10/ each		
Mahā-bhāṣya-pradipōdyōta, Vol. I, Fasc 1–9 ; Vol. II, Fasc. 1-12 Vol. III,	19	6
Fasc. 1-10 @ /10/ each	1	4
Ditto Vol. IV, fasc. 1 @ /4	1	14
Manuṭikā Sangraha, Fasc. 1-3 @ /10/ each	9	0
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–9 @ 1/- each		

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पक्षधर्म्मतानिश्चयस्य निवेशनीयत्वादित्यर्थः, यथाश्रुतविषयानुगमो नादरणीयः भ्रमासंग्रहात् (१)। रूपान्तरेण व्याप्तिविषयकज्ञानजन्ये (२) अतिप्रसङ्गात् प्रतिबन्धकतावच्छेदकविषयिताशालिज्ञानस्य तादृशविषयतावद्विषयकत्वेन निवेशस्य शिरोवेष्टनेन नाशिकास्पर्शतुल्यत्वाच्च। व्याप्त्यवच्छिन्नहेतुविषयतैव वा व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वेन निवेशनीया, तत्प्रतिबन्धकत्वेन पक्षधर्म्मताज्ञानमेव कथं न निवेश्यते इति चेन्न, तथा सति धूमो-वह्निव्याप्यो द्रव्यवान्पर्व्वत इत्यादिज्ञानाव्यावृत्तेः प्रतिबन्धकतावच्छेदकविषयतानिरूपितविशेष्यत्वावच्छिन्ना या हेतुविषयता तन्निरूपितपक्षविषयताशालित्वेन प्रतिबन्धतावच्छेदकहेतुविषयतावच्छिन्नतत्प्रकारतानिरूपितपक्षविषयताशालित्वेन वा ज्ञाननिवेशस्यावश्यकत्वात् ।

चिन्तामणिदीधितिः ।

भवति हि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियोगित्वे वा गृहीते नियमतो वह्निव्यभिचारधीप्रतिरोधः तथाविधधूमसमानाधिकरणत्वादिकन्तु न तथा रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहात् । व्यति-

---

(१) यत्र व्याप्तिघटकपदार्थांशे भ्रमात्मकः परामर्शः तदसंग्रहात् । भ्रमानुमितेरलक्ष्यत्वे प्रमानुमितौ स्वरूपयोग्यतामादाय लक्षणसमन्वये त्वाह, रूपान्तरेणेति ।

(२) प्रमेयवद्धूमवान् पर्व्वत इति ज्ञानजन्ये इत्यर्थः ।

State Museum Library Lucknow 5140

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रेकसहचारेणान्वयव्याप्तिग्रहणाश्रयणाद्वा। न च भ्रम-संशयोत्तरप्रत्यक्षं प्रति विशेषदर्शनस्य हेतुतामते तत्राऽतिव्याप्तिः, तथाविधनिश्चयत्वेन हेतुताया विवक्षितत्वात् विशेषदर्शनस्य च भ्रमादिविरोधित्वेन तत्त्वमित्युक्तत्वात्।

गादाधरी विवृतिः।

अत्र व्यापकताज्ञानस्य कथञ्चित् व्यभिचारधीविरोधित्वेऽपि साध्याभावव्यापकाभावप्रतियोगित्वज्ञानस्य तद्विरोधित्वे मानाभावः ग्राह्याभावाद्यनवगाहित्वात् हेत्वभावप्रतियोगिकाभावत्वेन हेतौ साध्याभावसामानाधिकरण्यावगाहिनीं हेत्वभावे साध्याभावसमानाधिकरणाभावप्रतियोगित्वमवगाहमानां (१) धियं प्रति हेत्वभावे साध्याभावसमानाधिकरणाभावाप्रतियोगित्वरूपसाध्याभावव्यापकत्वज्ञानस्य विरोधित्वेऽपि हेतुतावच्छेदकरूपेण हेतौ साध्याभावसामानाधिकरण्यधियं प्रति तस्यातथात्वात् (२) हेत्वभावाभावत्वेन हेतुधर्म्मिकव्यभिचारधीनिवेशे च हेतुव्यापकसाध्यसामानाधिकरण्यज्ञानासंग्रहः हेत्वभावाभावत्वेन हेतुविषयकतत्समानाधिकरणाभावप्रतियोगित्वग्रहे तेनैव रूपेण तद्विषयकतत्समानाधिकरणाभावाप्रतियोगित्वज्ञानस्य प्रतिबन्धकत्वादित्या-

---

(१) हेत्वभावाभावत्वावच्छिन्ने साध्याभावसामानाधिकरण्यपक्षे तुल्यवित्तिवेद्यतया हेत्वभावे साध्याभावसमानाधिकरणाभावप्रतियोगित्वस्यावगाहनादिति भावः।

(२) हेत्वभावे साध्याभावव्यापकत्वज्ञानस्याप्रतिबन्धकत्वादित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शङ्का मणिमत्त्वादिन्यायेन एकविधव्यभिचारधियं प्रति उभय-विधव्याप्तिज्ञानस्य प्रतिबन्धकताव्यवस्थापकं तत्सत्त्वे फलानुत्पाद-नियममाह, 'भवति ह्रीत्यादि, रासभादौ धूमव्यापकवह्निसामा-नाधिकरण्यग्रहेऽपि वह्निव्यभिचारग्रहात् (१) वह्निसमानाधिक-रणधूमत्वग्रहानुधावनम् । 'वह्निव्यभिचारधीप्रतिरोधः' तद्धेतु-समानधर्म्मिकवह्निव्यभिचारग्रहानुत्पादः । नन्वत्र प्रतिबन्धकता-वच्छेदकत्वं न स्वरूपसम्बन्धविशेषः, व्यापकसमानाधिकरण्य-घटकसामानाधिकरण्यांशस्य व्यभिचाराविघटकतया व्यापकता-विषयकत्वस्यैव तद्धियो व्यभिचारधीविरोधितावीजत्वात्, सामा-नाधिकरण्यविषयतायाः प्रतिबन्धकतावच्छेदकशरीरेऽनन्तर्भावेन प्रतिबन्धकतावच्छेदकतया धूमव्यापकत्वविषयतायास्तदवच्छिन्न-वह्निविषयताया वा उपादेयतया तादृशविषयतया च समं पक्ष-विशेषणतापन्नहेतुविषयत्वादेर्निरूप्य-निरूपकभावविरहेण दर्शित-रूपेण परामर्शनिवेशासम्भवात्, अतोऽत्र यादृशविषयताकनिश्चय-त्वव्यापकं प्रतिबन्धकत्वं तादृशत्वमेव प्रतिबन्धकतावच्छेदकत्वं वाच्यं तथाच धूमव्यापकवह्निसमानाधिकरणधूमसामानाधिकरण्यादि-विषयताकनिश्चयत्वस्यापि धूमधर्म्मिकव्यभिचारधीप्रतिबन्धकता-व्याप्यतया तद्विषयताया अपि तथात्वमक्षतमेवेति वह्निव्याप्य-धूमसमानाधिकरणरासभवानितिज्ञानजन्येऽतिप्रसङ्गः । न च पक्ष-विशेषणतया भासमानो यादृशधर्म्मस्तादृशधर्म्मांशे व्यभिचार-

---

(१) तादृशसामानाधिकरण्यविशिष्टधूमत्वस्यैव व्यभिचारविरुद्धत्वादिति भावः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानमेव विवक्षितं अतोनायं दोष इति वाच्यम्। तादृशरासभवान् धूमवांश्च पक्ष इति समूहालम्बनस्य तावताप्यवारणादित्याशङ्का पक्षविशेषणतापन्नहेतोर्या विषयता प्रतिबन्धकतावच्छेदिका प्रतिबन्धकतावच्छेदकविषयतानिरूपिता वा स्वावच्छेदकधर्म्मावच्छिन्नधर्म्मिकव्यभिचारज्ञानस्य प्रतिबन्धकतावच्छेदकत्वेन प्रतिबन्धकतावच्छेदकविषयतानिरूपितत्वेन वा सैव निवेश्या इत्याशयेन समाधत्ते, 'तथाविधधूमेति वह्निव्याप्यधूमसामानाधिकरण्याद्यवच्छिन्नरासभादिविषयत्वन्तु, 'न तथा' न स्वावच्छेदकावच्छिन्नधर्म्मिकव्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वादिमदित्यर्थः। एवमपि धूमव्यापकवह्निसमानाधिकरणरासभसमानाधिकरणधूमवानयमित्यादिज्ञानाव्यावृत्तिरित्यत आह, 'व्यतिरेकेति।

परे तु ननु वह्नित्वाद्यवच्छिन्नधर्म्मिकधूमत्वाद्यवच्छिन्नव्यापकत्वग्रहत्वेनैव धूमो वह्निव्यभिचारीत्यादिव्यभिचारज्ञानप्रतिबन्धकता लाघवादावश्यकत्वाच्च न तु धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तिज्ञानत्वेन गौरवात् मानाभावाच्च, तथाच तादृशव्याप्तिविषयता न व्यभिचारधीप्रतिबन्धकतावच्छेदिका। अथ इदन्त्वावच्छिन्ने तादृशधूमत्वादिरूपव्याप्तिग्रहे तदवच्छिन्ने व्यभिचारग्रहानुदयात् समानधर्म्मिकव्यभिचारज्ञानं प्रति तादृशव्याप्तिज्ञानत्वेनापि मणिमन्त्रादिवत् पृथक्प्रतिबन्धकता वाच्या, तथाच तादृशव्याप्तिविषयताया व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वमक्षतमेव। न च धर्म्मितावच्छेदकत्वनिरूपितविरोधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकारताया एव प्रतिबन्धकतावच्छेदकतया धूमव्यापकवह्नि-समानाधिकरणवृत्तिधूमत्ववत्त्वान् पक्ष इत्याकारकतादृशधूमत्वात्मकव्याप्त्यंशे निर्धर्म्मितावच्छेदककज्ञानीयतादृशव्याप्तिप्रकारताया व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वासम्भवात् तादृशपरामर्शासंग्रहः। प्रतिबन्धकतावच्छेदकीभूतप्रकारतावच्छेदकतापर्य्याप्त्यधिकरणधर्म्मावच्छिन्नप्रकारताशालिपक्षधर्म्मताज्ञाननिवेशे च धूमत्वादिना पदार्थान्तरावगाहिपरामर्शासंग्रहः, तादृशप्रकारतावच्छेदकतापर्य्याप्त्यधिकरणस्य वास्तवधूमादिघटितव्याप्तित्वस्य तादृशभ्रमप्रकारतानवच्छेदकत्वादिति वाच्यम्। धर्म्मिविशेष्यतानिष्ठव्यभिचारधीप्रतिबन्धकतावच्छेदकतायां (१) निरूपितत्वसम्बन्धेन यत्प्रकारताया अवच्छेदकत्वं तदवच्छेदकतापर्य्याप्त्यधिकरणरूपाश्रयीभूतप्रकारताशालित्वेन सकलपरामर्शसंग्रहसम्भवादिति (२) चेत्तर्हि, वह्निव्याप्यधूमसामानाधिकरण्यादिविषयत्वेन किमपराद्धं दर्शितव्याप्तिवत्तद्घटितधर्म्मान्तराणामपि व्यापकता-

---

(१) अत्र सप्तम्यर्थः निरूपितत्वम्।

(२) यद्यपि धर्म्मिविषयतानिष्ठावच्छेदकतानिरूपितं यत्प्रकारतानिष्ठनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वं तदवच्छेदकतापर्य्याप्त्यधिकरणं यत्परम्परया धर्म्मिविषयतानिरूपित-व्याप्तिघटकधूमादिविषयतानिरूपितत्वघटितनिरूप्य-निरूपकभावापन्नप्रकारतात्वं तस्य परम्परया धर्म्मिविषयत्वानिरूपित-व्याप्तिघटकधूमादिप्रकारतानिरूपितत्वघटितनिर्द्धर्म्मितावच्छेदककज्ञानीयप्रकारतायामसत्त्वात् निरूपितभेदेन निरूपितत्वस्य भेदात् निर्द्धर्म्मितावच्छेदककपरामर्शासंग्रहः, तथापि तादृशप्रतिबन्धकतावच्छेदकतापर्य्याप्त्यधिकरणधर्म्मवत्प्रकारत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकीभूतप्रकारताशालित्वेन सकलपरामर्शसंग्रहः, विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति निर्द्धर्म्मितावच्छेदककज्ञानसाधारणविशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वादेतदपि चिन्त्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घटितत्वाविशेषात्, किमपराद्धं वा धूमत्वाद्यसङ्हितेन धूमव्यापकवह्निसामानाधिकरण्यादिना, तत्तद्विषयितायो अपि व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वोपगमे वह्निव्याप्यधूमसमानाधिकरणरासभवानयं धूमव्यापकवह्निसमानाधिकरणरासभवानयमित्यादिज्ञानजन्येऽतिप्रसङ्गो दुर्व्वार इत्याशङ्क्य मणिमन्त्रादिन्यायेन प्रतिबन्धकतान्तरकल्पनमप्यनुभवानुरोधेनैव धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्यत्वग्रहे तद्धर्म्मितावच्छेदकावच्छिन्ने व्यभिचारधीर्नोत्पद्यते इति निर्व्विवादानुभवात्तद्ग्रहस्य समानधर्म्मितावच्छेदककव्यभिचारधीप्रतिबन्धकत्वमावश्यकं वह्निव्याप्यधूमसमानाधिकरणोरासभ इत्यादिज्ञानदशायाञ्च रासभादौ वह्निव्यभिचारग्रहस्यैवानुभवात् न तथाविधधूमसामानाधिकरण्यादिज्ञानत्वेनापि प्रतिबन्धकत्वान्तरमिति विशेषमाह, 'भवति हीत्यादिना 'रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहादित्यन्तेन। ननु धूमव्यापकवह्निसमानाधिकरणधूमत्वादिग्रहविषये यदि व्यभिचारज्ञानानुत्पादोऽनुभवसिद्धस्तदा वह्निर्धूमव्यापक इत्यादिज्ञानकालीनकेवलधूमत्वादिग्रहविषयेऽपि तदनुत्पादस्तथा सामाधिकरण्यांशस्याकिञ्चित्करत्वादिति साध्ये धूमादिव्यापकताग्रहकालीनधूमत्वादिग्रहत्वेनैव प्रतिबन्धकत्वमुचितम्। वस्तुतो वह्न्यादौ धूमत्वाद्यवच्छिन्नव्यापकताग्रहदशायां धूमत्वाद्यवच्छेदेन वह्न्यव्यभिचारस्यापि सुग्रहतया (१) धूमव्यापकवह्निसमानाधिकरणधूमत्वादि-

---

(१) वह्नौ धूमत्वावच्छिन्नसमानाधिकरणाभावाप्रतियोगित्वनिश्चयस्यैव तुल्यवित्तिवेद्यतया धूमत्वावच्छिन्ने वह्न्यभाववद्वृत्तित्वाभावग्रहरूपत्वादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्रहविषयेऽवच्छेदकधर्म्मदर्शनरूपप्रतिबन्धकवशादेव न व्यभिचारग्रह इति न तादृग्धूमत्वादिविषयताया व्यभिचारग्रहप्रतिबन्धकतावच्छेदकत्वमिति नोक्तानुगमः साधीयानत आह, 'व्यतिरेकसहचारेणेति व्याचक्रुः।

'व्यतिरेकसहचारेण' अन्वयसहचारग्रहनिरपेक्ष्यव्यतिरेकसहचारग्रहेणापि, 'अन्वयेति अन्वयव्याप्तिर्गृह्यते इत्याचार्य्यमताश्रयणादित्यर्थः, तथाच व्यतिरेकिण्यपि अन्वयव्याप्तेरेव गमकतयाऽनुगमासम्भवेऽपि नाव्याप्तिरिति भावः। यद्यप्येतन्मतं न विचारसहम् इत्युपेक्ष्य मणिकृता व्यतिरेकव्याप्तेरेवानुमित्यौपयिकत्वं व्यवस्थापितम्। तथापि जातिघटितलक्षणादरेणाननुगमनिबन्धनाव्याप्तेः परिहरणीयतया आपाततस्तन्मतावलम्बनेन समाहितम्। ननु विपरीतभ्रमानन्तरं ग्राह्यसंशयानन्तरञ्च विना ग्राह्यव्याप्यवत्ताज्ञानं पुरुषत्वादिनिश्चयो नोत्पद्यते सति तु तस्मिन् जायते अतोऽन्वय-व्यतिरेकात् विपरीतज्ञानानन्तरप्रत्यक्षनिश्चयत्वावच्छिन्नं प्रत्यपि ग्राह्यव्याप्यवत्तानिश्चयत्वेन हेतुता कल्प्यते। न च ग्राह्याभावज्ञानेन प्रतिबन्धादेव भ्रमाद्यनन्तरम् प्रत्यक्षनिश्चयानुत्पत्तिनिर्व्वाहे किं विशेषदर्शनहेतुतयेति वाच्यम्। विपरीतभ्रमादिसत्त्वेऽपि सति विशेषदर्शने प्रत्यक्षनिश्चयोत्पत्त्या प्रत्यक्षनिश्चये ग्राह्याभावज्ञानस्याप्रतिबन्धकत्वात् विपरीतनिश्चयकालेऽनुमित्यादेर्वारणाय विपरीतनिश्चयस्य विशिष्टधीविरोधित्वकल्पनाया आवश्यकत्वेऽपि प्रत्यक्षनिश्चयान्यत्वस्य तत्प्रतिबध्यतावच्छेदकत्वोपगमात्। न च प्रत्यक्षनिश्चयं प्रति विपरीतज्ञानस्याप्रतिबन्धकत्वे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शङ्खो न श्वेत इत्याकारकपित्तादिदोषजन्यविपरीतनिश्चयकाले श्वैत्यव्याप्यशङ्खत्वादिदर्शनात् शङ्खः श्वेत इत्यादिचाक्षुषापत्तिरिति वाच्यम्। तादृशदोषस्यैव श्वैत्यादिग्रहप्रतिबन्धकत्वात्। यदि च विनष्टेऽपि दोषे तादृशविपरीतनिश्चयसत्त्वे न श्वैत्यादिप्रत्यक्षं तदास्तु प्रत्यक्षे समानेन्द्रियजन्यस्य दोषविशेषाजन्योपनीतभानभिन्नविपरीतनिश्चयस्य प्रतिबन्धकत्वम् (१), एवं शङ्खः श्वेत इति चाक्षुषनिश्चयोत्पत्तौ सत्यां यत्र दोषसमवधानं तत्र तादृशनिश्चयसत्त्वे यदि दोषान्न शङ्खो न श्वेत इत्यादिचाक्षुषनिश्चयस्तदा तन्निर्व्वाहोऽपि समानेन्द्रियजन्यविपरीतनिश्चयप्रतिबन्धकत्वादेव(२) अतएव साक्षात्कारिभ्रमे साक्षात्कारिविशेषदर्शनमेव विरोधीत्यनेन मणिकृतां दोषविशेषजन्यभ्रमे समानेन्द्रियजन्यलौकिकग्राह्याभावज्ञानस्य विरोधिता नान्यविपरीतज्ञानस्य इत्यभिधानं संगच्छते। चक्षुषा वंशे उरगत्वभ्रमेऽपि त्वचा तत्र तदभावग्रहात् समानेन्द्रियजन्यत्वनिवेशनं, शङ्खो न श्वेत इत्यादिनिश्चयानन्तरं

---

(१) साक्षात्कारित्वप्रत्यक्षायोग्यस्य उपनीतभानरूपबाधग्रहस्य लौकिकप्रत्यक्षविरोधित्वनिर्व्वाहाय भिन्नान्तं, दोषविशेषजन्यस्य लौकिकप्रत्यक्षतुल्यस्य स्वर्य्यमाणारोपस्य तद्विरोधितानिर्व्वाहायाजन्यान्तं भेदप्रतियोगिविशेषणं, अत्र भिन्नान्तनिवेशापेक्षया साक्षात्कारित्वव्यञ्जकविषयतावत्त्वनिवेशे लाघवसम्भवात् तत्पक्षपरित्यागे किं वीजमिति चिन्तनीयम्।

(२) वस्तुतः समानेन्द्रियजन्यबोधस्य प्रतिबन्धकत्वं मिश्रैर्नाङ्गीक्रियते एवं विशेषदर्शनवशात् नोक्तस्थले आपत्तिः, विपरीतज्ञानविरोधित्वेनैव विशेषदर्शनस्य कारणत्वात्, तत्त्वञ्च विपरीतज्ञानाव्यवहितपूर्व्वत्वशून्यक्षणवृत्तित्वविशिष्टत्वं उक्तविशेषदर्शनस्य दोषविशेषजन्यज्ञानं प्रति अप्रतिबन्धकतया तदुत्तरं शङ्खो न श्वेत इत्यादिज्ञानोदयात्, तस्य च न विपरीतज्ञानविरोधित्वमिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सति विशेषदर्शने चाक्षुषसामग्रीविगमे शङ्खः श्वेत इत्यादि-मानसज्ञानमिष्यत एव विशेषदर्शनेन तन्निश्चयनाशे विशेषदर्शनेन प्रतिबन्धात् तादृशनिश्चयान्तरस्य चानुत्पत्त्या तादृशमानसोत्पादस्यावश्यकतया तत्पूर्व्वक्षणे तदुत्पादोपगमे अनुभवविरोधविरहात्। अस्तु वा तादृशमानसादिसाधारणं लौकिकनिश्चयान्यज्ञानत्वमेवानुमित्यादिसाधारणविपरीतनिश्चयप्रतिबध्यतावच्छेदकं, यत्र सत्यपि चक्षुरादिसन्निकर्षे कराद्यदर्शनसहितदूरत्वादिदोषादयं स्थाणुरित्यादिभ्रमः ततः करादिदर्शने नायं स्थाणुरित्यादिलौकिनिश्चयस्तत्रैव भ्रमोत्तरप्रत्यक्षे विशेषदर्शनत्वेन हेतुता। अथ तत्र भ्रमोत्पत्तिक्षणे न कथं तादृशलौकिकज्ञानं विपरीतज्ञानोत्तरप्रत्यक्ष एव विशेषदर्शनहेतुतया तदुत्पत्तिक्षणे प्रत्यक्षोत्पत्तेर्विशेषदर्शनविरहेऽपि दुर्व्वारत्वात्। यदि च दूरत्वादिदोषेण प्रतिबन्धान्न तदा तदुत्पादापत्तिरिति, तदा भ्रमोत्तरं विशेषदर्शनात् कथं तदुत्पत्तिस्तदापि तद्दोषसत्त्वात् इति चेन्न, विशेषदर्शनसहितस्यैव दूरत्वादेः प्रतिबन्धकत्वेनोभयोपपत्तेः (१)। अस्तु वा तादृशदोषसमवधानकालीनप्रत्यक्षेऽपि विशेषदर्शनस्य हेतुत्वान्तरं विपरीतज्ञानवत्तादृशदोषाणाञ्चाप्रतिबन्धकत्वमिति मते प्रत्यक्षविशेषेऽतिव्याप्तिमाशङ्क्य निराकरोति, 'न चेत्यादिना, भ्रमो विपरीतनिश्चयः, एतच्च मतं मिश्राणामेवा-

(१) अत्रेदं चिन्त्यं तादृशप्रतिबन्धकतास्वीकारे उक्तस्थले विशेषदर्शनस्य हेतुत्वं निर्युक्तिकं, परन्तु यत्र विनश्यदवस्थदोषेण भ्रमो जनितस्तद्द्वितीयक्षणे प्रत्यक्षवारणाय विशेषदर्शनस्य हेतुत्वं बोध्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नुमतं न तूपाध्यायानां तैर्विशेषदर्शनाभावविशिष्टसंशयसाधारण-विपरीतज्ञानप्रतिबन्धकतामुपगम्य संशयाद्युत्तरं प्रत्यक्षनिश्चय-वारणात्। न च विशेषदर्शनाभावविशिष्टग्राह्याभावज्ञानत्वेन विशिष्टबुद्धिप्रतिबन्धकत्वे बाधनिश्चयकाले लिङ्गपरामर्शरूपविशेष-दर्शनात् अनुमित्यापत्तिर्विशिष्टाभावसत्त्वात् एवं निश्चयत्वानिवे-शात् संशयोत्तरं संशयानुपपत्तिः योग्यतासंशयस्य शाब्दबोध-प्रतिबन्धकतापत्तिश्च प्रतिबध्यतावच्छेदके निश्चयत्वप्रवेशेन संशयो-त्तरसंशयोपपादने बाधनिश्चयोत्तरमपि संशयापत्तिरिति वाच्यम्। परोक्षज्ञाने बाधनिश्चयस्य प्रतिबन्धकत्वान्तरकल्पनेन बाधनिश्चय-दशायामनुमित्यापत्तिवारणात्, प्रत्यक्षनिश्चयत्वस्यैव च संशया-दिसाधारणविपरीतधीप्रतिबध्यतावच्छेदकतया ग्राह्यसंशयोत्तरं शाब्दबोधाद्युपपत्तेः। न चैवं बाधनिश्चयोत्तरं संशयस्यापत्तिः, अनुमित्यादिसाधारणबाधनिश्चयप्रतिबध्यतावच्छेदकगर्भे प्रत्यक्ष-निश्चयान्यत्वस्य प्रवेशनीयतया संशयस्य निश्चयप्रतिबध्यतोपपत्तेः। न च प्रत्यक्षनिश्चयान्यबुद्धौ विपरीतनिश्चयत्वेन प्रतिबन्धक-त्वान्तरस्य एतन्मतेप्यावश्यकत्वे प्रत्यक्षनिश्चये विशेषदर्शनाभाववि-शिष्टविपरीतज्ञानाभावहेतुताकल्पनापेक्षया विशेषदर्शनस्य लघो-र्हेतुत्वकल्पनमेवोचितमिति वाच्यम्। व्याप्तेः सम्बन्धादिभेदेन भिन्नतया व्याप्यदर्शनस्याननुगमेन व्यभिचारात् तद्धेतुत्वकल्पना-सम्भवात्, नानाविधविशेषदर्शनाभावकूटविशिष्टविपरीतज्ञाना-भावस्यानुगतत्वाच्च। अन्यथा (१) अत्रैवान्यत्वाप्युत्तेजकहेतुतया

---

(१) तत्तद्विशेषदर्शनाभावकूटत्वावच्छिन्नाभावत्वादिना कथञ्चिदुपपत्ताविव्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतिप्रसङ्गवारणसम्भवेन सर्व्वत्र उत्तेजकविलयप्रसङ्गात्। एवमसत्यपि विशेषदर्शने विपरीतज्ञानासत्त्व इव विरीतज्ञानसत्त्वेऽपि सामान्यसामग्रीबलात् प्रत्यक्षसामान्यापत्तिर्दुर्वारैवेति विपरीतज्ञानानुत्तरप्रत्यक्षे संशयसाधारणविपरीतज्ञानाभावस्य विशेषसामग्रीत्वमावश्यकमिति गौरवम्। न च नानाविधविशेषदर्शनाभावानां विपरीतधीप्रतिबन्धकतावच्छेदकगर्भे निवेशे एकाभावविशिष्टत्वेनैवापराभावस्य निवेशनीयतया तावदभावानां परस्परमप्रामाण्यग्रहाभावादिभिश्च समं विशिष्य-विशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यमिति तादृशतादृशविशेषदर्शनानन्तरप्रत्यक्षे तादृशतादृशविशेषदर्शनानां विपरीतज्ञानानुत्तरप्रत्यक्षे तदभावस्य च पृथक्कारणत्वं युक्तमिति वाच्यम्। आनन्तर्य्यस्य स्वत्वघटितत्वेन कार्य्य-कारणभावस्य तत्तद्व्यक्तिविश्रामापत्तेः। यदि च नानाविधविशेषदर्शनानां विपरीतज्ञानविरोधित्वेनानुगमान्नैकविधविशेषदर्शनस्यान्यविधविशेषदर्शनजन्यप्रत्यक्षे व्यभिचार इति न तज्जन्यतावच्छेदककोटावानन्तर्य्यनिवेशनं अत एवावच्छेदकधर्म्मदर्शनस्यापि संग्रह इत्युच्यते, तदापि विपरीतज्ञानानुत्तरप्रत्यक्षे विशेषदर्शनस्य व्यभिचारवारणाय विपरीतज्ञानाव्यवहितोत्तरत्वस्य विशेषदर्शनजन्यतावच्छेदकगर्भेऽवश्यं निवेशनीयतया विशेषदर्शनजन्यतावच्छेदकस्य तत्तद्व्यक्तिविश्रामो दुर्व्वार एव। एवं विपरीतज्ञानप्रतिबध्यतावच्छेदकशरीरेऽव्यवहितोत्तरत्वनिवेशस्यावश्यकतया (१) तदननुगमात्, तदभावजन्य-

---

(१) अनुत्तरत्वघटकतयावश्यकतयेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तावच्छेदकस्य तत्तद्विपरीतज्ञानाव्यवहितोत्तरत्वाभावकूटगर्भत्वा-द्गौरवं दुर्व्वारम्।

यत्तु विशेषदर्शनजन्यप्रत्यक्षं व्याप्यधर्म्मविशिष्टधर्म्मिविशेष्य-कमेव, तदनुत्तरन्तु न तथा, तथाच तथात्वातथात्वयोर्विशेष-दर्शन-विपरीतज्ञानाभावजन्यतावच्छेदकप्रवेशेनैव व्यभिचारवारणे नानन्तर्य्यप्रवेश इति, तदपि न, करादिमान् पुरुष इत्यादि-निश्चयकालीनकरादिमत्तारूपावच्छेदकधर्म्मनिश्चयस्य पुरुषत्वा-दिनिश्चायकतया तज्जन्यनिश्चये विपरीतज्ञानाभावव्यभिचारस्या-नन्तर्य्यमनिवेश्य दुर्व्वारत्वात्, करादिमत्तावच्छिन्नाविशेष्यकत्वस्य विपरीतज्ञानाभावजन्यतावच्छेदकत्वे करादिमान् पुरुष इत्यादि-निश्चयशून्यकालीनकरादिमत्ताग्रहोत्तरजातस्य करादिमान् पुरुष-इत्यादिप्रत्यक्षस्यासंग्रहप्रसङ्गात्।

यत्तु विपरीतज्ञानविरोधित्वेनैव विशेषदर्शनादीनां हेतुता तत्त्वञ्च (१) विपरीतज्ञानाव्यवहितपूर्व्वत्वशून्यक्षणवृत्तित्वविशिष्टत्वं, तदवच्छिन्नञ्च निश्चयपूर्व्वं सर्व्वत्रैव सुलभमिति सामान्यतो निश्चय-त्वमेव तज्जन्यतावच्छेदकमिति विपरीतज्ञानानुत्तरप्रत्यक्षे तद-भावहेतुतापि नास्ति। न चैवं विशेषदर्शनोत्पत्तिकाले संशया-द्यनुत्पत्त्या तत्पूर्व्वक्षणेऽपि उक्तकारणसत्त्वाद्विशेषदर्शनानन्तरमिव तदुत्पत्तिक्षणेऽपि निश्चयो जायतामिति वाच्यम्। इष्टत्वात्। न च यत्र संशयाद्युत्तरमसत्यपि विशेषदर्शने न संशयादिः तत्र

---

(१) विपरीतज्ञानविरोधित्वञ्चेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निश्चयापत्तिरिति वाच्यम्। विपरीतकोटिनिवर्त्तकविशेषदर्शनाद्यसत्त्वे उपस्थिततत्कोटिज्ञानोत्पत्तेर्बाधविरहेणावश्यकत्वादिति। तदप्यसत्। अव्यवहितपूर्व्वत्वस्य तत्तद्व्यक्तिघटिततया गौरवादिति, एवं विशेषदर्शनानां हेतुत्वं दीधितिकाराणामप्यननुमतं संशयोत्तरविशेषदर्शनासत्वे संशयजनककोट्युपस्थितिधर्म्मिज्ञानादिघटितसामग्रीवशात् संशयस्योत्पादेन संशयान्यज्ञानत्वरूपनिश्चयत्वावच्छिन्नापत्त्ययोगात् तत्सामग्र्यभावसहितज्ञानसामान्यसामग्र्या एव तज्ज्ञानान्यज्ञानत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात्। अथैवं संशयसामग्र्यभावस्य निश्चयोत्पत्तावपेक्षणे संशयप्रयोजकविशेषदर्शनस्याभावो विशेषदर्शनं तन्निश्चयहेतुरिति आयातमिति चेन्न, तत्प्रयोजकाभावस्य तदन्यत्वावच्छिन्नाजनकस्यापि तदन्यत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात् अन्यथा पटज्ञानान्यघटज्ञानत्वावच्छिन्नोत्पत्तावपेक्षितस्य पटादिज्ञानसामग्र्यभावस्य पटज्ञानान्यज्ञानत्वावच्छिन्नहेतुताप्रसङ्गात्। विपरीतनिश्चयानन्तरञ्च तेन प्रतिबन्धादेव न प्रत्यक्षं विपरीतनिश्चयस्य प्रत्यक्षसाधारणलौकिकसन्निकर्षाद्यजन्यविशिष्टबुद्धित्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वात्, विपरीतनिश्चयानन्तरं विशेषदर्शने सत्यपि तन्नाशानन्तरमेव प्रत्यक्षं जायते (१)।

यत्तु भूतले घटो नास्तीति शाब्दादिनिश्चयानन्तरं लौकिक-

---

(१) मिश्रादिमते विपरीतनिश्चयोत्तरं विशेषदर्शने तदव्यवहितोत्तरक्षणे प्रत्यक्षनिश्चयः एतन्मते तृतीयक्षणे इति क्षणविलम्बस्य अपथनिर्णीतव्यत्वादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सन्निकर्षवशात् घटावगाहितत्संशयः कथं नोत्पद्यते लौकिकसन्निकर्षाजन्यतज्ज्ञानस्यैव तदभावनिश्चयप्रतिबध्यत्वात् अतो लौकिकनिर्णयान्यतद्वत्ताज्ञानत्वं तदभावनिश्चयाभावजन्यतावच्छेदकं वाच्यम् एवमपि यादृशसामग्रीबलात् लौकिकप्रत्यक्षे घटो भासते तत्सहितघटाभावोपस्थित्यादिसहितघटाभावभानसामग्रीतो बाधकाले संशयापत्तिर्दुर्व्वारैवेति निश्चयेऽपि विशेषसामग्र्यन्तरं कल्पनीयम्, तच्च निरुक्तविपरीतज्ञानविरोधित्वावच्छिन्नमेवेति (१) विशेषदर्शनस्यापि तेन रूपेण हेतुत्वमायातीति। तदसत्, लौकिकसामग्र्या बलवत्या विपरीतकोटिभानप्रतिबन्धकत्वादुक्तसंशयापत्त्ययोगात्, तत्प्रतिबन्धकत्वाकल्पने उक्तबाधनिश्चयानन्तरं लौकिकसन्निकर्षाद्यत्र वास्तवो घटादिनिश्चयस्तत्र घटाभावभानप्रतिबन्धकासत्त्वेन तज्ज्ञानापत्त्या संशयापादनस्य ब्रह्मणोऽपि दुर्व्वारत्वात् इति विशेषदर्शनहेतुतायां विवादान्मत इत्युक्तम्। संशयोत्तरप्रत्यक्षनिश्चये विशेषदर्शनहेतुत्वे घटादिप्रकारकमानसेच्छाविरहविशिष्टघटाभावादिशाब्दसामग्र्या योग्यतासंशयात्मकघटादिसंशयघटिताया घटादिमानसं प्रति प्रतिबन्धकत्वं न कल्प्यते इति लाघवं (२) तदानीं घटाभावादिमानसे तादृशशाब्द-

(१) तथाच प्रत्यक्षं द्विविधं लौकिकनिर्णयभिन्नं लौकिकनिर्णयात्मकञ्च, तत्र पूर्व्वस्मिन् बाधाभावः उत्तरत्र विपरीतज्ञानविरोधित्वावच्छिन्नञ्च कारणमिति विशेषसामग्रीविरहान्नापत्तिरिति भावः।

(२) संशयानन्तरं घटाभावव्याप्यवत्ताज्ञाने घटाभावशाब्दसामग्रीसत्त्वे न घटाभावमानसमतः समानविषये शाब्दसामग्र्याः प्रतिबन्धकत्वमवश्यं कल्प्यं, तथाच तत्प्रकारकमानसे तदभावशाब्दसामग्र्याः प्रतिबन्धकत्वाकल्पनमेव लाघवमिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सामग्र्याः प्रतिबन्धकतया मानसघटादिविशिष्टसंशयस्य विशेष-दर्शनरूपकारणविरहेणैव घटादिमानसनिश्चयस्य च वारणसम्भवात्। विशेषदर्शनसत्त्वे च तस्य विपरीतकोटिशाब्दधीप्रतिबन्धकत्वात् शाब्दधीसामग्र्यभावाज्जायत एव मानसमिति केचिन्मिश्रमतं परिष्कुर्वन्ति। ननु दीधिकारादिमतेऽपि व्याप्यवद्धर्मिनिश्चयस्य विशेषणज्ञानादिविधया तदुत्तरप्रत्यक्षहेतुतया तथाविधनिश्चयत्वेन हेतुत्वाविवक्षादशायां तादृशप्रत्यक्षेऽतिव्याप्तेरावश्यकत्वात् विशेषदर्शनस्य हेतुतामत इत्यभिधानमयुक्तमिति चेन्न, निश्चयत्वेन हेतुत्वविवक्षणे मिश्रान्यमते नातिव्याप्तिर्मिश्रमते च तादृशनिश्चयत्वेनापि प्रत्यक्षविशेषहेतुत्वेत्याशयेन तथाविधाभिधानात्। अग्रे च तादृशनिश्चयत्वेन हेतुत्वविवक्षामात्रेण न समाधानम्, अपि तु तद्विवक्षया प्रत्यक्षे तादृशनिश्चयत्वेन हेतुताविरहप्रदर्शनेन चेति सामञ्जस्यात्। अथवा (१) तादृशनिश्चयजन्यतावच्छेदकानुभवत्वव्याप्यजातिविवक्षणे (२) नान्यमतेऽतिव्याप्तिरित्याशयेन विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनहेतुतामते अतिव्याप्त्यभिधानम्। 'विशेषदर्शनस्य चेति, 'चः' त्वर्थे, 'भ्रमादिविरोधित्वेन' ग्राह्याभावविरोधित्वेन, 'तत्त्वं' प्रत्यक्ष-

---

(१) यथाश्रुतमभिप्रेत्य सुष्ठु समाधत्ते अथ वेति।

(२) अत्र जन्यता किञ्चिद्धर्मावच्छिन्नविशेष्यकत्वावच्छिन्ना ग्राह्या नातस्तत्प्रकारकप्रत्यक्षे तद्विषयकज्ञानत्वेन हेतुत्वात् तादृशजन्यतामादायातिव्याप्तिरिति, किञ्चिद्धर्मावच्छिन्नत्वनिवेशात् सामान्यलक्षणाजन्यप्रत्यक्षे नातिव्याप्तिरिति च विभावनीयम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशेषहेतुत्वं, 'उक्तत्वादिति, विशेषदर्शनत्वरूपेण हेतुत्वे अन्धकारे घटसंशये आलोकसमवधानात् तन्निश्चयानुपपत्तिः, एवं कुङ्कुमादौ तैलसंयोगादिरूपव्यञ्जकविरहाधीनसौरभादिसन्देहानन्तरं व्यञ्जकसमवधानेऽपि तन्निश्चयानुपपत्तिश्च। न चालौकिकत्वस्य विशेषदर्शनजन्यतावच्छेदकत्वोपगमात् नेयमनुपपत्तिः तत्र घट-सौरभादेर्लौकिकप्रत्यक्षस्यैव विशेषदर्शनं विनोत्पत्तेरिति वाच्यम्। लौकिकसन्निकर्षवत्यपि यत्र विशेषादर्शनसहितदूरत्वादिदोषप्रयुक्तः पुरुषत्वादिसंशयस्तत्र विशेषदर्शने सत्येव लौकिकप्रत्यक्षोत्पत्तेर्विशेषदर्शनजन्यतावच्छेदकरूपेण लौकिकस्यापि प्रत्यक्षस्य संग्राह्यत्वात्। अतएव विशेषदर्शने अनुमितिसामग्रीसत्त्वात् अनुमितिरेव भविष्यति न प्रत्यक्षमिति कथं तस्य प्रत्यक्षहेतुता इत्याक्षिप्य समानविषये प्रत्यक्षसामग्र्या बलवत्त्वमिति प्रत्यक्षमेव जायते नानुमितिरिति मणिकारेण समाहितमुत्पत्तिवादे (१)। विशेषदर्शनस्यालौकिकप्रत्यक्षमात्रहेतुत्वे तादृशप्रत्यक्षसामग्र्या अनुमितिसामग्र्यपेक्षया हीनबलत्वादसङ्गतेः। यदि च विपरीतज्ञानोत्तरप्रत्यक्षनिष्ठविशेषदर्शनजन्यतावच्छेदकशरीरे अलौकिकत्वनिवेशेऽपि न क्षतिः दूरस्थे धर्म्मिणि पुरुषत्वादिसन्देहोत्पत्तिक्षण एव लौकिकसन्निकर्षात्तन्निश्चयवारणाय दूरत्वादिदोषसमवधानकालीनप्रत्यक्षेऽपि विशेषदर्शनहेतुताया आवश्यकत्वात्तत एव दूरस्थे धर्म्मिणि संशयोत्तरमपि विना विशेषदर्शनं पुरुष-

---

(१) व्युत्पत्तिवादे इति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वादिनिश्चयवारणसम्भवात् इत्युच्यते। तदापि सम्बन्धादिभेदभिन्न-नानाविधव्याप्त्यवगाहिविशेषदर्शनावच्छेदकधर्म्मदर्शनसाधारणवि-शेषदर्शनत्वस्यानुगतस्याभावात् न तेन रूपेण हेतुतासम्भव इति विपरीतज्ञानविरोधित्वमेवानुगमकं वाच्यमिति भावः। अथ यदि आलोकसंयोगादिसाधारण्यं विपरीतज्ञानविरोधित्वस्य तदा तत्क-थमुपपद्यतां घटवद्भूतलादावालोकसंयोगादिसत्त्वेऽपि तत्र चक्षुः-संयोगाद्यसत्त्वे तत्सत्त्वेऽपि च दूरत्वादिदोषात् घटादिसंशयोत्पत्त्या आलोकसंयोगसत्त्वेन विपरीतज्ञानाविरोधित्वात्। अस्तु वा लौकि-कप्रत्यक्षकारणान्तरसमवहितालोकसंयोगत्वेन तथात्वं, तथापि तस्यात्मनिष्ठोऽन्यः सम्बन्धः(१) अन्यश्च(२) विशेषदर्शनस्येति उभयो-रनुगतकारणतावच्छेदकसम्बन्धो दुर्व्वच इति चेन्न, लौकिक-प्रत्यक्षकारणालोकसंयोगादिसमवहितात्ममनोयोगस्यैव आत्म-निष्ठप्रत्यासन्नस्य विपरीतज्ञानप्रतिबन्धकत्वोपगमेन तत्साधारण-तद्रूपावच्छिन्नस्य विशेषदर्शनस्य समवायसम्बन्धेनैव हेतुतासम्भवा-दित्यलमधिकेन।

चिन्तामणिदीधितिः।

अतएव लिङ्गवत्त्वादिलक्षणातिदेशवाक्यार्थज्ञान-जन्योपमितौ नातिव्याप्तिः, तथाविधवाक्यार्थप्रति-सन्धानत्वेन तस्य हेतुत्वात्। न चोपनयार्थज्ञान-

---

(१) स्वजनकादृष्टवत्त्वरूपः।

(२) अन्यः समवायः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जन्यन्यायार्थज्ञाने तच्छब्देन सङ्केतितशब्दान्तरेण वा व्याप्त्यादिविशिष्टोपस्थितिद्वारा जनिते शाब्दबोधेऽतिव्याप्तिः, व्युत्पादयिष्यते च महावाक्यार्थज्ञानस्यावान्तरवाक्यार्थधीजन्यत्वं तदादेश्च विशेषरूपेणोपस्थापकत्वमिति वाच्यम्। तत्रातिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशान्निश्चयत्वस्याप्रवेशाच्च।

गादाधरी विवृतिः।

तथाविधनिश्चयत्वेन हेतुताविवक्षणस्य प्रयोजनान्तरमपि दर्शयति, 'अतएवेति, 'लिङ्गवत्त्वादिलक्षणः' वह्निव्याप्यधूमवत्त्वादिघटितः, यः 'अतिदेशवाक्यार्थः' सादृश्यविशिष्टे पदवाच्यत्वादिबोधकवाक्यप्रतिपाद्योऽर्थः, तद्विषयकं यज्ज्ञानं वह्निव्याप्यधूमवत्पर्व्वतसदृशो महानसपदवाच्य इत्यादिज्ञानं तज्जन्यायाम् अयं महानसपदवाच्य इत्याद्युपमितौ वस्तुगत्या साध्यव्याप्यत्वावच्छिन्नहेतुप्रकारकं पक्षविशेष्यकं यत्तादृशं ज्ञानं तज्जन्यत्वेऽपि नातिव्याप्तिरित्यर्थः। 'तथाविधवाक्यार्थेति पदवाच्यत्वविशिष्टवह्निव्याप्यधूमवत्पर्व्वतसादृश्यावच्छिन्नवर्म्मिज्ञानत्वेनेत्यर्थः। यद्यपि भ्रमसाधारण्याय तादृशविशिष्टवाक्यार्थघटकतत्तत्पदार्थानां परस्परोपश्लेषावगाहित्वेनैव उपमितिविशेषहेतुताया वक्तव्यतया पक्षांशे व्याप्तिप्रकारेण हेतुमत्तावगाहिज्ञानत्वमप्युपमितिजनकतावच्छेदकं, तथापि पक्षांशे व्याप्याभावानवगाहितादृशहेतुमत्तावगाहिज्ञानत्वरूपमनुमितिजनकतावच्छेदकव्याप्यवत्पक्षनिश्चयत्वं नोक्तो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पमितिजनकतावच्छेदकम् अतिदेशवाक्यार्थज्ञाने व्याप्यवत्त्वस्य धर्म्मितावच्छेदककोटिनिविष्टतया भानाद्धर्म्मितावच्छेदकघटकांशे च संशयस्यानभ्युपगमात् उपमितिजनकतायां निश्चयत्वनिवेशन-स्यानर्थक्यादतो न तादृशरूपावच्छिन्नजनकताकत्वरूपानुमिति-लक्षणस्य तत्रातिव्याप्तिः। अतएव (१) निश्चयत्वपर्य्यन्तनिवेशन-मप्यर्थवत् (२)। अन्यथा (३) निश्चयत्वेनानुमितिजनकत्वेऽपि अधिकन्त्विति न्यायात् अनुमितिजनकतायाः पक्षविशेष्यक-व्याप्यवत्ताज्ञानत्वावच्छिन्नत्वात् तादृशज्ञानत्वावच्छिन्नजनकताक-त्वमात्रनिवेशेन भ्रमादिविरोधित्वावच्छिन्नहेतुताकप्रत्यक्षविशेषा-तिव्याप्तिवारणसम्भवेऽपि तदनर्थकत्वमापद्येत। वस्तुतस्तु (४) वह्निव्याप्यधूमवत्त्वेन (५) पर्व्वतसदृशो महानसपदवाच्य इत्य-

---

(१) उपमितावतिव्याप्तेरेवेत्यर्थः।

(२) उपमितावतिव्याप्तिवारणरूपप्रयोजनवदित्यर्थः।

(३) उपमितिविशेषेऽनतिव्याप्तौ।

(४) धर्म्मितावच्छेदकावच्छिन्ने सादृश्यज्ञानरूपोपमितिकारणतामादाय महानसपक्षकानुमितिस्थलीयलक्षणस्योपमितावतिव्याप्तिमाशङ्कते, वस्तुतस्त्विति।

(५) वह्निव्याप्यधूमवत्त्वेन पर्व्वतसदृशं महानसं इत्याकारकसादृश्यविशिष्ट-महानसप्रत्यक्षं पर्व्वतभिन्नत्वे सति पर्व्वतवृत्तितादृशधूमप्रकारकमहानसविशेष्यकं तदेवोपमानरूपं अतिदेशवाक्यार्थज्ञानद्वारा तज्जन्योपमितौ महानसपक्षकानुमिति-लक्षणस्यातिव्याप्तिः निश्चयत्वनिवेशेनापि न शक्यते वारयितुं इति पर्य्याप्तिनिवेशः तथा सति असम्भवभयेन तत्र निश्चयत्वनिवेश आवश्यकः, सादृश्यघटकवह्निव्याप्य-धूमादेस्तृतीयान्तत्वेनोपादानं ताद्रूप्येण धर्म्मिविशेषणतालाभाय तथाच वह्निव्याप्य-धूमेन पर्व्वतसदृशं महानसमिति ज्ञानञ्च पर्व्वतभिन्नत्वे सति पर्व्वतवृत्तिवह्निव्याप्य-धूमप्रकारकमहानसविशेष्यकं तज्जन्योपमितिः महानसं महानसपदवाच्यमित्या-कारिकेति समुदिततात्पर्य्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तिदेशवाक्यार्थज्ञानसहकृतव्याप्यवत्ताघटितसादृश्यज्ञानजन्यायामुपमितौ जनकतावच्छेदके वाप्यंशे पक्षवृत्तित्वावगाहित्वस्याधिकस्य (१) निवेशनेऽपि धर्म्मांशे व्याप्यवत्तावगाहिनिश्चयत्वरूपानुमितिजनकतावच्छेदकावच्छिन्नहेतुताकत्वस्य (२) तादृशोपमितावक्षतत्वात् अतिव्याप्तेर्वारणाय तादृशनिश्चयत्वपर्य्याप्तहेतुतावच्छेदकताकत्वपर्य्यन्तनिवेशनमावश्यकं (३) तथाच अनुमितिजनकतावच्छेदकता यादृशसमुदाये पर्य्याप्ता तादृशसमुदायस्यैव लक्षणे निवेशनमावश्यकमन्यथा समुदायपर्य्याप्तावच्छेदकताया एकदेशापर्य्याप्ततया असम्भवापत्तेः। अतएव उक्तनिश्चयत्वघटकाभावदलस्यापि सार्थकता, एवञ्चाप्रामाण्यज्ञानानास्कन्दितत्वस्य कारणतावच्छेदकत्वमते (४) तदंशोऽपि लक्षणे निवेशनीयः। न च सादृश्यज्ञानस्य उपमितिहेतुतायां पर्व्वतादिवृत्तित्वावच्छिन्नव्याप्यादिविषयता पर्व्वतादिवृत्तित्वावच्छिन्नविषयतात्वेनैव निवेश्या न तु व्याप्यादिविषयतात्वेन प्रयोजनाभावात् तथाचानुमितिजनकतावच्छेदकधर्म्मस्य उक्तोपमितिजनकतावच्छेदककोटिनिवेशोऽपि नास्ति किं पर्य्याप्तिनिवेशनेनेति वाच्यम्। व्याप्यवत्ता-

---

(१) तद्भिन्नत्वे सति तद्वृत्तिधर्म्मवत्त्वस्यैव तत्सादृश्यत्वात्।

(२) उपमितौ जनकतावच्छेदकधर्म्मितावच्छेदकघटकांशे निश्चयत्वानिवेशेऽपि प्रकारांशे निश्चयत्वनिवेशस्यावश्यकत्वादिति भावः।

(३) तथाच पूर्व्वत्र निश्चयत्वनिवेशनेन नातिव्याप्तिरत्र तु पर्य्याप्तिनिवेशान्नातिव्याप्तिरिति भावः।

(४) अप्रामाण्यज्ञानाभावस्य स्वातन्त्र्येण हेतुत्वं केषाञ्चित् सम्मतमतो मते इत्युक्तम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घटितसादृश्यावच्छिन्नधर्म्मिकवाक्यार्थज्ञानस्य तद्घटितसादृश्यज्ञान-सहकारिण फलजनकतया उभयत्र सादृश्यघटकधर्म्माणां विशिष्या-वश्यनिवेशनीयत्वात् । न च पर्य्याप्तिविवक्षायामपि धूमवत्त्वेन धूमव्यापकवह्निमत्सादृश्यात्मकतादृशवह्निमद्वृत्तिधूमवत्तानिश्चयज-न्योपमितावतिव्याप्तिः (१) न शक्यते वारयितुमिति वाच्यम् । सादृश्यघटकभेदविषयताया अपि प्रवेशेन विवक्षितनिश्चयत्वे तत्कारणतावच्छेदकतापर्य्याप्तिविरहात् । लाघवाद्भेदाघटितसादृ-श्यज्ञानमेवोपमितौ कारणमिति तु न वाच्यं, तथा सति गवादा-वपि सादृश्यनिश्चयसत्त्वेन गवयादिपदवाच्यत्वोपमित्यापत्तेः । यदि च वैधर्म्म्यज्ञानादपि उपमितिः स्वीक्रियते वैधर्म्म्यस्य च इतर-वैधर्म्म्यत्वेन ज्ञानं नापेक्ष्यते तदा व्याप्यधर्म्मरूपवैधर्म्म्यज्ञानजन्यो-पमितावतिव्याप्तिः (२) कारणतावच्छेदकतापर्य्याप्तिनिवेशेऽपि दुर्व्वारेति तद्वारणप्रकारश्चिन्त्यः (३) । महावाक्यार्थविषयकशाब्द-

(१) धूमवत्त्वेन धूमव्यापकवह्निमत्सदृशः पर्व्वतपदवाच्य इत्यतिदेशवाक्यार्थज्ञानं अयं धूमेन धूमव्यापकवह्निमत्सदृश इति सादृश्यज्ञानं ततोऽयं पर्व्वतपदवाच्य इत्युप-मितिस्तत्रातिव्याप्तिरिति भावः ।

(२) यथा अयमतिदीर्घग्रीवश्चपलतरौष्ठः कठोरकण्टकाशीति इतरवैधर्म्म्य-ज्ञानं ततोऽतिदीर्घग्रीवश्चपलतरौष्ठः कठोरकण्टकाशी करभपदवाच्य इति प्रागनु-भूतस्य वाक्यार्थस्य स्मृतिः ततोऽयं करभपदवाच्य इति प्रागनुभूतस्य वाक्यार्थस्य स्मृतिः ततोऽयं करभपदवाच्य इत्युपमितिः तथा पशुत्वव्याप्यसास्नावान् अयं इतीतरवैधर्म्म्यज्ञानं ततो वाक्यार्थस्मृतिः ततोऽयं गोपदवाच्य इति वैधर्म्म्यज्ञान-करणिका उपमितिः तत्रातिव्याप्तिः पर्य्याप्तिनिवेशेऽपि वारयितुं न शक्यते इति भावः ।

(३) चरमज्ञाने व्याप्यविषयकत्वस्याभावाविषयकत्वस्य उपमित्यन्यत्वस्य वा निवेश एव तत्प्रकारः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधे अवान्तरवाक्यार्थनिश्चयस्य तादृशनिश्चयत्वेनैव हेतुता, एवं विशिष्टपदार्थगोचरशाब्दबोधेऽपि विशिष्टपदार्थोपस्थितेस्तद्विषयक-निश्चयत्वेनैव हेतुता न तु विशेषणान्तरप्रवेश इत्यभिमानेन शाब्द-बोधविशेषेऽतिव्याप्तिमाशङ्कते, 'न चेत्यादिना, 'उपनयार्थज्ञानेति उपनयवाक्यप्रतिपाद्यसाध्यव्याप्यहेतुमत्पक्षरूपावान्तरवाक्यार्थज्ञा-नेत्यर्थः, 'न्यायार्थज्ञाने' निगमनसहकृतोपनयजन्ये वह्निव्याप्य-धूमवानयं धूमज्ञानज्ञाप्यवह्निमानित्यादिमहावाक्यार्थज्ञाने इत्यर्थः, तेन प्रतिज्ञादिपञ्चकवाक्यात्मकन्यायस्य विशिष्टैकार्थज्ञानजनक-तायाः स्वयं दूषणीयत्वेऽपि न क्षतिः। यद्यपि वह्निव्याप्य-धूमवांश्चायमित्याद्युपनयजन्यबोधे व्याप्यवत एवाभेदो धर्म्मिणि भासते न तु व्याप्यस्य व्याप्यतावच्छेदकसम्बन्धः नामार्थयोर्भेदे-नान्वयस्याव्युत्पन्नत्वात्। तथाच नातिव्याप्त्यवसरः पक्षांशे व्याप्य-प्रकारकज्ञानस्यैव लक्षणघटकत्वात्, यत्र तादात्म्यसम्बन्धेन धर्म्मिणो हेतुता तत्र व्याप्यस्य पक्षांशे तेन सम्बन्धेन उपनयप्रतिपाद्यत्वेऽपि व्याप्याभेदस्यैव हेतौ भानात् तदंशे व्याप्तिप्रकारकत्वाभावेन नाति-व्याप्त्यवसरः, तथापि तादात्म्यसम्बन्धावच्छिन्नव्याप्तिविशिष्टधर्म्मि-रूपहेतुपरतच्छब्दघटितस्य सचायमिति वाक्यस्य प्रतिपाद्ये विशि-ष्टार्थे निगमनार्थस्यान्यस्य वा कस्यचिदर्थस्यान्वयबोधस्तत्राति-व्याप्तिपरोऽयं ग्रन्थः, साध्यव्याप्यहेतुविशिष्टपक्षपर्य्यन्तपरतच्छब्द-जन्यबोधेऽतिव्याप्तिपरश्च 'तच्छब्देनेत्यग्रिमग्रन्थ इति न पौनरुक्त्यम्। व्याप्यविशिष्टपक्षरूपवाक्यार्थज्ञानजन्यतामादाय तद्घटितमहावा-क्यार्थबोधे संयोगादिसम्बन्धेन पक्षांशे व्याप्यप्रकारकज्ञानकरणता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घटितलक्षणस्य अतिव्याप्त्यसम्भवादेव च व्याप्यविशिष्टपक्षात्मकपदार्थज्ञानजन्यबोधेऽतिव्याप्तिमाह, 'तच्छब्देनेति, तादृशविशिष्टार्थबोधकपदान्तराभावात् सर्व्वनामानुधावनं, सर्व्वनाम्नां विशेषरूपेण पदार्थोपस्थापकतामत एव तज्जन्योपस्थितेः पक्षविशेष्यक व्याप्तिविशिष्टहेतुप्रकारकनिश्चयरूपतासम्भवः न तु वक्तृबुद्धिस्थत्वेन उपस्थापकतामत इत्यविवादायाह, 'शङ्केतितशब्दान्तरेण वेति व्याप्तिविशिष्टहेतुविशिष्टपक्षे आधुनिकशङ्केतशालिना घटादिपदेनेत्यर्थः। इदमुपलक्षणं विशिष्टपक्षलाक्षणिकपर्व्वतादिपदेनेत्यपि बोध्यम्। 'व्याप्त्यादिविशिष्टोपस्थितिद्वारा' व्याप्त्यवच्छिन्नहेतुविशिष्टपक्षोपस्थितिद्वारा, जनिते वह्निव्याप्यधूमवान् पर्व्वतोऽस्तीत्याकारकशाब्दबोधेऽतिव्याप्तिः। ननूपनयार्थघटितमहावाक्यार्थबोधे कथमतिव्याप्तिः उपनयार्थज्ञानस्य पक्षविशेष्यकव्याप्यप्रकारकज्ञानत्वेन तद्धेतुताया अप्रामाणिकत्वात्, तत्तत्पदार्थज्ञानत्वेन तदन्वयबोधे हेतुत्वादेवानुपस्थितपदार्थान्वयबोधाप्रसक्तेः। न च खण्डशः सकलपदार्थोपस्थितावपि अवान्तरवाक्यार्थज्ञानं विना तद्घटितमहावाक्यार्थज्ञानानुदयात् अवान्तरवाक्यप्रतिपाद्यो यादृशविशिष्टार्थस्तद्विषयकज्ञानत्वेन महावाक्यार्थबोधहेतुत्वमावश्यकमिति वाच्यम्। दण्डी कुण्डली वासस्वी चैत्र इत्यादौ दण्डादिविशेषणान्वितचैत्रादिज्ञानं विनैव तादृशवाक्यार्थघटिततावद्विशेषणान्वितविशिष्टरूपमहावाक्यार्थधियः समूहालम्बनतावत्पदार्थस्मृतित उत्पत्तेर्मणिकृता स्वीकारादित्यत आह, 'व्युत्पादयिष्यत इति, 'महावाक्यार्थज्ञानस्य' विशिष्टपदार्थेनापर-

5140

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पदार्थसंसर्गावगाहिज्ञानस्य, 'अवान्तरेति तादृशविशिष्टार्थविषयकज्ञानत्वावच्छिन्नजन्यत्वमर्थः। अयम्भावः। यादृशविशेषणविशिष्टस्य विशेष्यस्य विशेषणस्य वा शब्दादुपस्थितिस्तादृशेनैव विशिष्टेन विशेषणान्तरस्य विशेष्यान्तरस्य वा अन्वयबोधोऽनुभवसिद्धः, यत्र युगपदेव एकस्मिन् धर्म्मिणि समूहालम्बनोपस्थितनानाविशेषणान्वयबोधस्तत्र विशेषणानां तुल्यतया भानात् नासौ एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यबोधः, अतो न तत्र विशेषणविशिष्टविशेष्योपस्थितेरपेक्षा, एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यं विशिष्ये वा यत्र विशेषणान्तरविशिष्टस्य वैशिष्ट्यं भासते सबोधो विशिष्टविषयकबोधादेव उत्पद्यते, न तु विशृङ्खलसमूहालम्बनात् अतएव इष्टविशेष्यकउपायसाध्यताज्ञानस्य प्रवर्त्तकतामाशङ्क्य तन्मते (१) विधिवाक्यात् वाक्यभेदभिया (२) कृतिसाध्ययागसाध्यमिष्टमित्येतादृशस्य समूहालम्बनविलक्षणविशिष्टयागविशेषणकबोधस्यैव स्वीकार्य्यतया तदर्थमन्तरा कृतिसाध्यो याग इत्यवान्तरवाक्यार्थबोधस्य कल्पनीयतया गौरवं, उपायविशेष्यकफलसाधनताबोधस्य प्रवर्त्तकत्वे च आहत्यैव (३) एकत्र द्वयमिति रीत्या कृतिसाध्यत्वेष्टसाधनत्वरूपविशेषणद्वयावगाही यागः कृतिसाध्य इष्टसाधनमिति बोधः स्वीक्रियते इति लाघवमित्युक्तं विधिवादे मणिकारेण, विशिष्टेन सममन्यान्वयबोधे विशिष्टधियो हेतुत्वे

(१) इष्टविशेष्यकोपायसाध्यताज्ञानस्य प्रवर्त्तकतामते।

(२) कृतिसाध्यो यागः यागसाध्यमिष्टमिति वाक्यभेदभियेत्यर्थः।

(३) साक्षादेवेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तादृशान्वयतात्पर्य्यधीघटितशाब्दसामग्र्या भिन्नविषयकप्रत्यक्षादि-प्रतिबन्धकतायां विशिष्टविषयकैकोपस्थितिर्निविश्यते अन्यथा तत्-स्थाने विशेषण-विशेष्योपस्थितिद्वयम् अतो लाघवादपि तद्धेतुता-सिद्धिः । एवञ्च उपनयप्रतिपाद्यहेतुविशिष्टपक्षविशेष्यकेतरान्वय-बोधेऽतिव्याप्तिर्दुर्व्वारैवेति । ननु तदादेर्व्विशेषरूपेणोपस्थापक-ताया विचारासहत्वात् कथं तदादिपदजन्यशाब्दबोधेऽतिव्याप्ति-सङ्गतिः । तथा हि तदादिपदस्य न घटत्व-रूपत्वादिविशेषधर्म्म-विशिष्टे (१) शक्तिः नानार्थताप्रसङ्गेन गौरवात्, घटादिकं बुद्धि-स्थीकृत्य प्रयुक्ततच्छब्दात् पटादिबोधस्य शक्तिभ्रममन्तरेणापि प्रसङ्गात् । न च वस्तुगत्या यद्रूपावच्छिन्नं बुद्धिस्थीकृत्य यत्पदव्यक्तिः प्रयुक्ता तद्रूपावच्छिन्ने तस्याः शक्तिः अतो नायं दोष इति वाच्यम् । एवमपि पदव्यक्तिभेदेनानन्तशक्तिकल्पनया गौरवात्, यत्पदव्यक्ति-प्रयोज्या प्रयोज्यवृद्धप्रवृत्तिर्नोपलब्धा तत्पदव्यक्तौ शक्तेरगृहीतत्वेन ततोऽन्वयबोधानुपपत्तेः अतः सामान्यतः स्वप्रयोक्तृपुरुषबुद्धिस्थे तदादिपदसामान्यशक्तिः कल्पनीया, तथाच तत्त्वेनैवोपस्थितिः सर्व्वनामपदाद्भविष्यति न तु विशेषरूपेण । न च बुद्धिस्थत्वेन शक्या-नुगमेऽपि तेन रूपेण व्युत्पत्तौ सत्यां (२) घटत्वादिरूपविशेषधर्म्म-पुरस्कारेण बुद्धिस्थत्वज्ञानरूपविशेषदर्शनात् (३) उपलक्षणीभूत-घटत्वादिप्रकारेण शक्तिग्रहसम्भव इति तेन रूपेण न तत्पदादुप-

(१) घटत्व-पटत्वादिविशेषधर्म्मविशिष्टे इति पा० ।

(२) शक्तिज्ञाने सतीत्यर्थः ।

(३) बुद्धिस्थस्तत्पदवाच्यः बुद्धिस्थो घट इत्यादिरूपविशेषदर्शनादित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थितिर्दुर्लभा सम्बन्धग्रहप्रकारताया एव स्मृतिप्रकारताप्रयोजकतया प्रकारांशे शक्तिग्रहानपेक्षणादिति वाच्यम्। द्रव्यादिपदात् घटत्वादिप्रकारेण शक्तिभ्रमशून्यस्य शाब्दबोधानुदयात् शक्त्यधीनोपलक्षणीभूतधर्म्मप्रकारकोपस्थितिः शाब्दबोधानुपयोगित्वादित्यत आह, 'तदादेश्वेति, 'विशेषरूपेणोपस्थापकत्वं' 'व्युत्पादयिष्यत इत्यनुषङ्गेनान्वयः। अयमभिप्रायः। स्वप्रयोक्तृबुद्धिप्रकारत्वेनानुगतीकृतघटत्वादिरूपविशेषधर्म्मविशिष्टे तत्पदशक्तिः अतो न विशेषणभेदेन शक्त्यानन्त्यं न वा विशेषधर्म्मप्रकारकशाब्दबोधोपयोगिविशेषधर्म्मप्रकारकोपस्थितिर्दुर्घटा। न च तादृशबुद्धिविषयत्वविशिष्टे शक्त्यैवोपोपपत्तौ किमेतावता प्रयासेन विशेषरूपेणोपस्थापकताविरहेऽपि क्षतिविरहादिति वाच्यम्। विशेषधर्म्मप्रकारकसंशयनिवृत्त्यर्थमपि (१) तदादिघटितवाक्यप्रयोगाद्विशेषप्रकारेण शाब्दबोधस्य दुरपह्नवतया तदुपपत्तये तदादेर्व्विशेषरूपेण उपस्थापकतायाअवश्योपपाद्यत्वात्। बुद्धिप्रकारत्वेन प्रवृत्तिनिमित्तघटत्वादीनामनुगमेऽपि तादृशधर्म्मस्याशक्यतया तदंशपरित्यागेन निर्व्विशेषणकघटत्वादिप्रकारकबोधोपपत्तिः बुद्धिप्रकारत्वस्याशक्यत्वेऽपि तत्पदं बुद्धिप्रकारविशिष्टं बोधयतु इत्याकारकभगवत्सङ्केतरूपशक्ती तेनानुगतरूपेण घटत्व-पटत्वादिभानात् शक्तेरैक्यं, बुद्धिप्रकारत्वस्य सङ्केतविषयत्वेऽपि तस्य शक्योपलक्षणता न तु शक्यान्तर्भावेन विशेषणत्वं, तदुपलक्षितघटत्वादिप्रकारकत्वेनैव बोधस्य सङ्केत-

---

(१) तमानयेति वाक्यानन्तरं आनयनं घटकर्म्मकं न वेति संशयनिवृत्त्यर्थमित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयत्वात् न तु तद्विशिष्टप्रकारकत्वेन । शाब्दबोधप्रकारतायां शाब्दबोधविषयतावच्छेदकत्वेन सङ्केतविषयत्वज्ञानं (१) प्रयोजकं, यथा घटत्वस्य घटपदजन्यशाब्दबोधप्रकारतायां घटत्वावच्छिन्नो घटपदजन्यशाब्दबोधविषयतावान् भवतु इत्याकारसङ्केतीयस्य शाब्दबोधविषयतावच्छेदकत्वेन विषयत्वस्य ज्ञानं (२), तादृशसङ्केतग्रहस्य घटत्वावच्छिन्नत्वविषयतानिरूपितसङ्केतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविषयतावान् घट इत्याकारकः, शाब्दबोधप्रकारतावच्छेदकतायाञ्च शाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन सङ्केतविषयत्वज्ञानं (३), यथा लोमत्वस्य पशुपदजन्यशाब्दबोधप्रकारतावच्छेदकतायां लोमत्वावच्छिन्नलोमावच्छिन्नः पशुपदजन्यशाब्दबोधविषयतावान् भवतु इत्याकारकसङ्केतीयशाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन विषयत्वज्ञानं, तादृशसङ्केतग्रहस्य लोमत्वावच्छिन्नस्वनिष्ठावच्छेदकताकत्वसम्बन्धावच्छिन्नलोमनिष्ठ-प्रकारतानिरूपितविशेष्यतावच्छिन्ना या शाब्दबोधविषयत्वनिष्ठप्रकारता तन्निरूपितविशेष्यतावान् लोमादिमान् इत्याकारकः । प्रकृते च बुद्धिप्रकारत्वाश्रयावच्छिन्नस्तत्पदजन्यशाब्दबोधविषयो भवतु इत्याकारकभगवत्सङ्केतीयं शाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन विषयत्वं न बुद्धिप्रकारत्वस्य किन्तु तदंशे

---

(१) शाब्दबोधविषयतावच्छेदकत्वनिष्टविषयतानिरूपितस्य सङ्केतीयविषयत्वस्य ज्ञानमित्यर्थः ।

(२) प्रयोजकमिति पूर्व्वेणान्वयः ।

(३) अत्रापि प्रयोजकमित्यस्यानुषङ्गः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सङ्केतेन शाब्दबोधविषयतावच्छेदकतासामानाधिकरण्यस्यैवाव-गाहनात् सङ्केतीयशाब्दबोधविषयतावच्छेदकतासमानाधिकरण-त्वेनैव विषयत्वमिति तस्य तत्पदजन्यशाब्दबोधप्रकारतानव-च्छेदकत्वनिर्व्वाहः। इदञ्च विशिष्टशक्तपदस्थले, उपलक्षितवाचक-गगनादिपदस्थले च यद्धर्म्मं धर्म्मितावच्छेदकीकृत्य शाब्दबोधविषय-त्वेन सङ्केतविषयत्वग्रहस्तद्धर्म्मप्रकारक एव बोध उत्पद्यते इति तत्र शब्दाश्रयत्वाद्यनियतधर्म्मप्रकारकबोधनिर्व्वाहः।

दीधितिकारास्तु सर्व्वत्रैव शाब्दबोधप्रकारतायां तदवच्छेद-कतायाञ्च सङ्केतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविशेष्यता-वच्छेदकत्व-तदवच्छेदकत्वरूपशक्यतावच्छेदकत्व-तदवच्छेदकत्वज्ञानं हेतुः, यथा घट पशुपदस्थले घटत्व-लोमत्वादेः, गगनादिपदस्थले च शब्दाश्रयत्व एव निरुक्तशक्यतावच्छेदकत्वसत्त्वात् शब्दाश्रयत्वप्रका-रक एव शक्तिभ्रमाजन्यबोध इति घटपद-गगनपदयोरविशेष इति वदन्ति। तन्मते बुद्धिप्रकारत्वस्य शाब्दबोधप्रकारतानवच्छेदकत्वं दुरुपपादम्।

नानार्थहर्य्यादिपदस्थले चोपलक्षणीभवता केनाप्यनुगतरू-पेण (१) प्रवृत्तिनिमित्तानामभानात् अशक्यस्वरूपसदनुगतरूप-सत्त्वेऽपि शक्तिभेदान्नानार्थतानिर्व्वाहः। बुद्धिप्रकारविशिष्टवाचकं तत्पदमिति सर्व्वोपसंहारेण व्युत्पत्तिसौकर्य्यादपूर्व्वचैत्रत्वादि-विशिष्टे तदादिघटितवाक्यात् प्रवृत्त्याद्यनुपलम्भेऽपि न तत्-प्रकारकशाब्दबोधस्य तदादिपदादनुपपत्तिः। अथ सामान्यतो-

(१) अन्यतमत्वादिनेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्युत्पत्तेश्चैत्रत्वाद्यपूर्व्वधर्म्मविशिष्टगोचरत्वेऽपि स्वरूपतस्तद्धर्म्मप्रकारेण शक्त्यग्रहात् स्वरूपतस्तत्प्रकारकोपस्थितिः तादृशशाब्दबोधस्य चानुपपत्तिः, जातिमान् हस्तिपकसम्बन्धी इति ज्ञानात् स्वरूपतो हस्तित्वादिप्रकारकस्मरणानुदयात् स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकसम्बन्धधिय एव हेतुत्वात्। यत्तु अनुगमकधर्म्ममोषवशात् सामान्यव्युत्पत्त्यधीनं स्वरूपतश्चैत्रत्वादिप्रकारकशक्तिस्मरणं सुघटमिति ततस्तादृशचैत्रत्वादिप्रकारकपदार्थोपस्थिति-शाब्दबोधयोर्नानुपपत्तिरिति । तदसत् । स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकानुभवस्यैव हेतुताया व्यवस्थापनान्मोषवशेन विशिष्टतत्प्रकारकानुभवादविशिष्टतत्प्रकारकस्मरणानुत्पत्तेरिति चेन्न, प्रकरणादिना निर्व्विशेषणकचैत्रत्वाद्यवच्छिन्ने वक्तुर्बुद्धिविषयताग्रहे बुद्धिविषयतावच्छेदकविशिष्टवाचकं तत्पदमिति स्मृतौ सत्यामविशिष्टचैत्रत्वादिविशिष्टवाचकतायास्तदादिपदेन मानसज्ञानस्यैवान्ततः सम्भवेन सामञ्जस्यात्। न च चैत्रोऽस्य वक्तुर्बुद्धिस्थ इति निश्चयेन चैत्रे विशिष्य तत्पदवाच्यतानिश्चयेऽपि चैत्रत्वविशिष्टे तत्पदवाच्यताया अनिश्चयात् तत्प्रकारकशाब्दबोधानुपपत्तिरिति वाच्यम्। यद्विशिष्टविषयकबुद्धिप्रयोज्यं यत्पदं तत् तद्विशिष्टवाचकमिति सामान्यतोव्याप्तेरवधारणेन प्रकरणाद्यधीनस्य तत्पदविशेषे चैत्रत्वविशिष्टविषयकबुद्धिप्रयोज्यत्वग्रहस्य विशेषदर्शनतया तद्विशिष्टवाचकतासंशयविघटकत्वेन विशिष्टवाचकतायाः सुनिश्चयत्वात्। न चैवमपि स्वप्रयोजकबुद्धिप्रकारत्वे स्वपदार्थस्याननुगमेन सकलतत्पदाद्युपसंहारेण व्युत्पत्तिर्दुर्घटेति यत्पदव्यक्त्यधीनप्रवृत्तिर्नो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पलब्धा तस्या व्युत्पत्त्यनुपपत्तेस्तदधीनशाब्दबोधानुपपत्तिवारणमशक्यमेवेति वाच्यम्। तदननुगमोद्धारस्यावहितैः परिचिन्तनीयत्वादित्यलमधिकेन (१)।

'तत्रातिरिक्तस्येति, शाब्दबोधनिरूपितावान्तरवाक्यार्थबोधपदार्थोपस्थितिनिष्ठजनकतावच्छेदकगर्भेऽनुमितिजनकतावच्छेदकोक्तधर्म्माप्रविष्टस्य पदवृत्तिज्ञानजन्यत्वस्य निवेशादित्यर्थः। यत्रावान्तरवाक्यार्थबोधानन्तरं चरमपदज्ञानं तदुत्तरं चरमपदार्थस्मृतिस्तत्र तदानीमवान्तरवाक्यार्थगोचरशाब्दबोधस्य विनष्टत्वात् महावाक्यार्थबोधहेतुत्वासम्भवेऽपि यत्र तादृशशाब्दबोधोत्पत्तिद्वितीयक्षण एव पूर्व्वोत्पन्नचरमपदज्ञानात् चरमपदार्थस्मृतिस्तात्पर्य्यादिविषयकसमूहालम्बनरूपा तत्रैव तादृशशाब्दबोधस्य महावाक्यार्थबोधहेतुत्वम्, अन्यत्र (२) समूहालम्बनरूपतावत्पदज्ञानजन्यतावत्पदार्थगोचरसमूहालम्बनस्मृतिरेव गतिः। इदन्तु बोध्यम्

---

(१) तत्पदं स्वजनकत्व-स्वप्रकारप्रकारकबुद्धिप्रयोज्यत्वोभयसम्बन्धेन बोधविशिष्टं भवतु इत्याकारकभगवत्सङ्केतरूपशक्तौ स्वपदस्य परिचायकत्वान्नाननुगमः। अथवा स्वप्रयोजकतावच्छेदकीभूता या बुद्धिप्रकारता तदाश्रयावच्छिन्नविषयताकत्व-स्वजन्यत्वोभयसम्बन्धेन बोधस्तदादिपदवान् भवत्वित्याकारको भगवत्सङ्केतो वाच्यस्तत्र च स्वपदार्थस्य सम्बन्धघटकतया तत्तत्पदव्यक्तित्वेन न पदानां विषयता अपि तु सर्व्वनामसंज्ञकतत्पदत्वादिरूपानुपूर्व्वीविशेषेणैवेति, न पदव्यक्तिभेदेन शक्तिभेदः, अत्रच संसर्गघटकं विषयतायां प्रकारावच्छिन्नत्वं वैशिष्ट्यरूपं ग्राह्यं तच्च स्वनिष्ठावच्छेदकतानिरूपकत्व-स्वसामानाधिकरण्योभयसम्बन्धेन बोध्यं, एतदुभयसम्बन्धघटकसामाधिकरण्यघटकाधिकरणविषयतैव शक्तिरिति न काप्यनुपपत्तिरिति बोध्यम्।

(२) खले कपोतन्यायस्थले इत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अवान्तरवाक्यार्थबोधस्य महावाक्यार्थबुद्धौ शाब्दत्वजातिपुरस्कारेणैव कारणता न तु पदजन्यत्वेन गौरवात् । न च तथासति विशिष्टविषयकशाब्दबोधादिव विशिष्टे गृहीतवृत्तिकपदजन्यविशिष्टस्मृतेरपि विशिष्टे इतरान्वयबोधोत्पत्त्या तत्र विशिष्टविषयकशाब्दधियो व्यभिचारः स्यादिति तादृशस्मृतिसाधारणपदजन्यत्वेनैव हेतुत्वमुचितमिति वाच्यम् । पदज्ञानजन्यत्वेन स्मृति-शाब्दधियोरनुगमे पदरूपलिङ्गज्ञानजन्यार्थविषयकानुमित्यादितोऽपि शाब्दधीप्रसङ्गात् वृत्तिमत्पदजन्यस्मृतित्व-शाब्दत्वाभ्यां कारणताद्वयस्यावश्यकत्वान्मिथो व्यभिचारस्य चागत्या तत्तत्कारणाव्यवहितोत्तरत्वस्य कार्य्यतावच्छेदके निवेशेनैव वारणीयत्वात् । यत्रावान्तरवाक्यार्थबोधान्महावाक्यार्थधीस्तत्राप्यवान्तरवाक्यार्थघटकार्थान्तरस्य पदजन्यस्मृतेरवान्तरवाक्यार्थबोधानन्तरमप्यवश्यकल्पनीयतया तस्याः सकलपदार्थविषयकत्वोपगमेन पदार्थस्मृतेरवान्तरवाक्यार्थधीजन्यशाब्दबोधे व्यभिचारवारणन्तु न सम्यक्, विशिष्टे गृहीतवृत्तिकपदाधीनविशिष्टस्मृतेरिव विशेष्यमात्रे गृहीतवृत्तिकपदाधीनाया उद्बोधकान्तरवशाद्विशेषणमवगाहमानायाविशिष्टस्मृतितो व्याप्यविशिष्टपक्षादिविषयकेतरान्वयबोधवारणाय गृहीतविशिष्टवृत्तिकपदजन्योपस्थितित्वेनैव विशिष्टविषयस्मृतेस्तादृशान्वयबोधहेतुताया वक्तव्यतया विशिष्टवृत्तिकग्रहानपेक्षावान्तरवाक्यार्थशाब्दधीजन्यबोधे तस्या व्यभिचारस्यावश्यकत्वात्, प्रकारान्तरेण तद्वारणे (१) तावत्पदार्थविषयकस्मृतिकल्पनाया अकि-

(१) कार्य्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशेन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्चिल्कारत्वात्, अतोप्यवान्तरवाक्यार्थधियश्च शाब्दत्वपुरस्कारेण कारणत्वान्तरमावश्यकमिति पदजन्यत्वपदं पदाजन्यबोधव्यावृत्त-धर्म्मपरं, तच्च शाब्दत्वादिकमपीति। अधिकप्रवेशेन निरुक्तनिश्चय-त्वपर्य्याप्तजनकतावच्छेदकताघटितस्य लक्षणस्य नातिव्याप्तिरि-त्युक्त्वा निश्चयत्वप्रवेशेन पर्य्याप्त्यनिवेशनेऽपि नातिव्याप्तिरित्याह, 'निश्चयत्वस्येति, परोक्षसंशयानभ्युपगमेन संशयान्यत्वस्य उक्तयुक्त्या शाब्दत्वादेर्निवेशनीयतया ज्ञानत्वस्य च पदजन्यबुद्धावव्यावर्त्तक-त्वादिति भावः।

चिन्तामणिदीधितिः।

न च तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषणा-तावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात् तादृशि शाब्द-बोधे प्रत्यक्षे चातिव्याप्तिः दण्डो रक्तो न वेति संशये रक्तदण्डवानयमिति ज्ञानानुदयादिति वाच्यम्। ज्ञानोपरमेऽपि विशिष्टविषयोपधानेनेच्छा-द्वेषयोः कृतेश्च साक्षात्काराद्विशेषणविषयकाद्विशिष्टसंस्कारादेव विशि-ष्टस्मरणाच्च तद्विषयकगुणानां तत्र हेतुत्वे न्यूनवृत्ते-र्ज्ञानत्वस्य तत्राप्रवेशादिच्छादितः संस्काराच्चानुमिते-रनुदयात् संस्काराद्यन्यत्वस्य गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गादाधरी विवृतिः।

व्याप्तिविशिष्टहेतुरूपविशेषणतावच्छेदकविशिष्टस्य तद्विशेषणधर्म्मितावच्छेदकपर्व्वतत्वाद्यवच्छिन्नस्य वैशिष्ट्यावगाहिनि शाब्दबोधादौ प्रत्यक्षादिसाधारणविशिष्टवैशिष्ट्यबोधनिष्ठविशेषणतावच्छेदकप्रकारकनिश्चयजन्यतामादायातिव्याप्तिं शङ्कते, 'नचेत्यादिना, 'तथापि' अवान्तरवाक्यार्थबोधनिष्ठशाब्दबोधासाधारणकारणतामादायातिव्याप्तेरुक्तरीत्या वारणेऽपि, 'तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रतीति पर्व्वतत्वादिरूपधर्म्मितावच्छेदकावच्छिन्नविशेषणतापन्नव्याप्तिविशिष्टधूमादिविशिष्टवैशिष्ट्यज्ञानत्वावच्छिन्नं प्रतीत्यर्थः, 'तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन' पर्व्वतत्वाद्यवच्छिन्नविशेष्यकव्याप्तिविशिष्टधूमादिप्रकारकनिश्चयत्वेन, 'तादृशे' वह्निव्याप्यधूमवत्पर्व्वतवान् देश इत्यादिविशिष्टवैशिष्ट्यबोधरूपे, शाब्दबोधातिव्याप्तेर्व्वारितत्वात् तस्यैव प्रथममुपन्यासः, स्मृतिव्यावृत्तधर्म्मस्य जन्यतावच्छेदकत्वे (१) स्मृतौ नातिव्याप्तिसम्भवः, उपमितेः पदवाच्यत्वावगाहिन्यास्तादृशविशिष्टवैशिष्ट्यबोधरूपताप्रयासो न सम्भवतीति, अतः प्रत्यक्ष-शाब्दबोधमात्रोपादानम्। अथ किमिदं विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकम् विशिष्टवैशिष्ट्यज्ञानत्वं, न तावद्विशिष्टप्रतियोगिकं यद्वैशिष्ट्यं तदवगाहित्व, व्यधिकरणसम्बन्धावगाहिविशिष्टभ्रमासंग्रहात्, नापि विशिष्टप्रकारकत्वं, काञ्चनमयवह्निमानित्यादिभ्रमप्रकारीभूत-

(१) विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वे इत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशिष्टाप्रसिद्धेः तत्र काञ्चनमयो वह्निरित्यादिज्ञानानपेक्षणीयतापत्तेः, नापि विशेषणान्तरप्रकारेण (१) भासमानप्रकारकत्वं, रक्तोदण्डः दण्डवान् पुरुष इति समूहालम्बनेऽपि दण्डोरक्त-इति ज्ञानापेक्षाप्रसङ्गात्, नापि विशेषणान्तरप्रकारतानिरूपित-विशेष्यत्वावच्छिन्नप्रकारताकत्वं, रक्तत्वादिप्रत्येकपदार्थोपस्थिति-मूलके रक्तदण्डवान् इत्यादिज्ञाने व्यभिचारात्, नहि तादृशा-कारकबोधो रक्तोदण्ड इत्यादिविशिष्टज्ञानानन्तरमेव जायते इति दीधितिकाराद्यनुमतं, बाधग्रन्थे काञ्चनमयत्वविशिष्टवह्नेर-प्रसिद्धेरेव (२) उपनीत(३)काञ्चनमयत्वविशिष्टवह्निवैशिष्ट्यानु-मितिः शुद्धवह्नित्वाद्यवच्छिन्नव्याप्यधूमादिना पर्व्वते न सम्भवतीति कथं तद्विरोधितया व्यधिकरणकाञ्चनमयत्वावच्छिन्नवह्न्यभावस्य दोषान्तरासङ्कीर्णबाधहेत्वाभासतेति मणिकारोक्तेर्विशिष्टविशेषण-ज्ञानं विनापि विशेष्ये विशेषणं तत्र च विशेषणान्तरमित्यादिरीत्या तादृशानुतिसम्भव इत्यभिधाय स्वयं दूषणीयत्वाद्विशिष्टव्याप्तिज्ञानं विनापि तद्घटकप्रत्येकपदार्थोपस्थितिभ्यो विशिष्टपरामर्शोत्पत्त्या अनुमितिरिति मिश्रेणानाने चाभिधानात् एकत्वविशिष्टकर्त्तुः पूर्व्वमज्ञानेऽपि क्षितिरेककर्त्तृकेत्यनुमितेरनेन स्वीकृतत्वाच्च।

---

(१) फलतः तन्निष्ठप्रकारतानिरूपितविशेष्यताविशिष्टप्रकारताकत्वं तद्विशिष्ट-वैशिष्ट्यावगाहित्वं, वैशिष्ट्यञ्च स्वनिरूपकज्ञानीयत्व-स्वसामानाधिकरण्योभय-सम्बन्धेनेति बोध्यम्।

(२) अनुपस्थित्यैवेत्यर्थः।

(३) पर्व्वतः काञ्चनमयेतरवह्न्यभाववानित्यादीतरबाधोपनीतेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्राहुः विशेषणान्तररक्तत्वादिविशेष्यतापन्नदण्डादिप्रकारकं रक्त-दण्डवानित्यादिज्ञानं द्वेधा रक्तत्वाद्यवच्छिन्नप्रतियोगिकत्वेन दण्डा-दिवैशिष्ट्यावगाहि, तद्रूपानवच्छिन्नतद्वैशिष्ट्यावगाहि: च, तादृश-विशिष्टप्रतियोगिकत्वञ्च दण्डादिप्रकारतानिरूपकसंसर्गतायामव-च्छेदकतया भासते तद्विशिष्टसंयोगादेरेव दण्डादिसंसर्गतया भानात्, दण्डादिविशेषणतापन्नरक्तत्वादेरेव वा स्वावच्छिन्नप्रति-योगिकसंयोगाद्यात्मकपरम्परासम्बन्धेन पुरुषादौ प्रकारता तादृश-विशिष्टवैशिष्ट्यबोध एव विशेषणतावच्छेदकप्रकारकधियः कार-णत्वं न तु विशिष्टविशेषणावगाहिन्यपि रक्तत्वादिकं वैशिष्ट्य-प्रतियोग्युपलक्षणतयावगाह्यमाने द्वितीयबोधे। अतएव च प्रति-योगिविशेषिताभावबुद्धौ घटो नास्तीत्याकारिकायां प्रतियोगिनि प्रकारीभवतो घटत्वादेः प्रतियोगितावच्छेदकतयैव भानमिति, तत्र घटत्वादिप्रकारकज्ञानापेक्षानियमः। यद्यपि विशिष्ट-विशेषणावगाहिज्ञानमात्र एव विशिष्टज्ञानापेक्षायां मणिकारादेः स्वरसस्तथापि लाघवोपनीतैकत्वादिविशिष्टकर्त्राद्यनुमितिर्विशिष्ट-ज्ञानमनपेक्ष्यैवोत्पद्यते इत्यनुरोधाद्दीधितिकारादीनां दर्शित-विशेषादरः। दण्डोनास्ति रक्तोनास्तीतिज्ञानदशायां नियमतो रक्तदण्डोनास्ति इत्यादिज्ञानोत्पादविरह एव उक्तविशिष्ट-वैशिष्ट्यबोधे विशेषणतावच्छेदप्रकारकविशेषणधीहेतुताकल्पकः। दण्डोरक्त इत्यादिज्ञानदशायामपि कदाचित्तादृशसमूहालम्बन-बुद्धावुत्पद्यमानायां (१) दण्डोरक्तो नास्तीति बुद्धेरनुत्पादे अगत्या

(१) दण्डोनास्ति रक्तोनास्तीत्यादिसमूहालम्बनबुद्धावुत्पद्यमानायामित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्रानुगतस्य कस्यचित् प्रतिबन्धकता कल्प्यत इति विवेचनीयश्चेदमधिकमन्यत्र ।

केचित्तु रक्तदण्डवानित्यादिज्ञानीयरक्तत्वादिविशेष्यतापन्नदण्डादिनिष्ठा प्रकारता द्विधा, काचिद्दण्डादिविशेषणतापन्नरक्तत्वाद्यन्तर्भावेण पर्य्याप्ता, काचित् केवलदण्डादावेव, तत्र प्रथमा विशेषणतावच्छेदकप्रकारज्ञानाधीना नापरा, पुरुषादिविशेष्यतानिरूपितप्रकारताया रक्तत्वादिवृत्तित्वेऽपि पुरुषो न रक्त इत्यादिधीर्न तादृशप्रकारताकोक्तज्ञानविरोधिनी इतरविशेषणतानवच्छिन्नायाः पुरुषादिविशेष्यतानिरूपितरक्तत्वादिप्रकारताया एव तत्प्रतिबध्यतावच्छेदकत्वादित्याहुः (१) ।

---

(१) तथाच तदभाववत्ताबुद्धिप्रतिबध्यतावच्छेदककोटौ तदितरनिष्ठप्रकारत्वानवच्छिन्नतन्निष्ठप्रकारताया निवेश्यत्वादिति भावः। न च तथापि रक्तदण्डवान् इत्यादि ज्ञानीयप्रकारता रक्तत्वाभाववान् दण्ड इति ज्ञानीयप्रतिबध्यतावच्छेदिका न स्यात् तज्ज्ञानीयरक्तत्वप्रकारताया रक्तत्वेतरदण्डनिष्ठोभयपर्य्याप्तप्रकारत्वावच्छिन्नत्वादिति वाच्यम्। तदितरनिष्ठप्रकारतापदेन तद्वृत्तिप्रकारताया एव विवक्षितत्वात। न च तथापि रक्तदण्डवान् पुरुष इति ज्ञानस्य भ्रमत्वापत्तिः रक्तत्वाभाववत्पुरुषनिष्ठविशेष्यतानिरूपितरक्तत्वप्रकारताकत्त्वादिति वाच्यम्। भ्रमत्वघटकीभूततन्निष्ठप्रकारतायामपि तदितरप्रकारत्वानवच्छिन्नत्वस्य निवेशात्, तथाच रक्तदण्डवान् पुरुष इति विशिष्टवैशिष्ट्यबोधीयदण्डनिष्ठप्रकारताद्वयं, एका रक्तत्व-दण्डोभयपर्य्याप्ता, अपरा दण्डमात्रनिष्ठा, एवं रक्तत्वप्रकारतापि द्विविधा, एका पुरुषविशेष्यतानिरूपिता उभयपर्य्याप्ता, अपरा दण्डविशेष्यतानिरूपिता तन्मात्रपर्य्याप्ता, तादृशप्रकारताद्वयस्यावच्छेद्यावच्छेदकभाव इति। इतरविशेषणतानवच्छिन्नाया इत्यादि भट्टाचार्य्यसन्दर्भोपरि पुनराशङ्केयं, अथ रक्तदण्डवान् पुरुष इति ज्ञानस्य दण्डाभाववान् पुरुष इति निश्चयप्रतिबध्यत्वानुपपत्तिः पुरुषादिविशेष्यतानिरूपितदण्डादिप्रकारताया दण्डादिविशेष्यतानिरू-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपरे तु यथा विशेष्यतानिरूपितप्रकारतामात्रं न विशेष्यतावच्छेदकता भूतलं घटवदित्यादौ भूतलत्वादेर्घटादिधर्म्मितावच्छेदकतावद्वैपरीत्यस्यापि प्रसङ्गात्(१), अपि तु विलक्षणैव विषयता सा च प्रकारतात्मिका तदन्यैव वा, एवं विशेषणतावच्छेदक-

---

पितरक्तत्वादिप्रकारतया अवच्छिन्नत्वात्। न चेतरविशेषणतावच्छेद्यतानवच्छेदकदण्डादिप्रकारतात्वविशिष्टाया दण्डादिप्रकारतायाः पुरुषादिविशेष्यतानिरूपितायाः प्रतिबध्यतावच्छेदकत्वोपगमात् नैषदोषः, उक्तस्थले रक्तत्वादिप्रकारतात्वस्यैव दण्डादिप्रकारतानिष्ठदण्डादिविशेष्यतानिरूपितविशेषणतावच्छेद्यतावच्छेदकत्वादिति वाच्यम्। दण्डवद्दण्डवान् इत्यादि ज्ञानस्य दण्डाभाववान् पुरुष इत्यादिनिश्चयप्रतिबध्यतानुपपत्तिः। न च दण्डत्वानवच्छिन्नविशेष्यतानिरूपितविशेषणतावच्छेद्यतानवच्छेदकत्वनिवेशान्नेयमनुपपत्तिरिति वाच्यम्। रक्तदण्डवान् इति ज्ञानस्य रक्तत्वाभाववान् दण्ड इत्यादिनिश्चयप्रतिबध्यतानुपपत्तेः। रक्तत्ववद्रक्तत्ववान् पुरुष इत्यादिज्ञाने रक्तत्वाभाववान् पुरुष इत्यादिनिश्चयस्य प्रतिबन्धकत्वानुरोधेन रक्तत्वावच्छिन्नविशेष्यतानिरूपितविशेषणतावच्छेद्यतानवच्छेदकत्वविवक्षणस्यावश्यकतया रक्तत्वादिप्रकारतात्वस्य रक्तत्वानवच्छिन्ना या दण्डत्वावच्छिन्नविशेष्यता तन्निरूपितरक्तत्वविशेषणतावच्छेदद्यतावच्छेदकत्वादिति चेन्न, रक्तत्वावच्छिन्नविशेष्यत्वानिरूपितविशेषणतावच्छेद्यत्वाभावविशिष्टायाः पुरुषादिविशेष्यतानिरूपितरक्तत्वादिप्रकारतायाः प्रतिबध्यतावच्छेदकत्वोपगमात् रक्तदण्डवान् पुरुष इत्यादौ रक्तत्वदण्डोभयपर्य्याप्तप्रकारत्वस्य रक्तत्वावच्छिन्नविशेष्यत्वानिरूपितदण्डत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वादिनिष्ठविशेषणतावच्छेद्यत्वात् न तादृशज्ञानस्य दण्डाभाववान् पुरुष इत्यादिनिश्चयाप्रतिबध्यत्वम्। दण्डवद्दण्डवानित्यादौ दण्डवद्दण्डपर्य्याप्तप्रकारतात्वस्य दण्डत्वावच्छिन्नविशेष्यत्वानिरूपितविशेषणतावच्छेद्यत्वाभावसत्त्वात् तादृशज्ञानस्य दण्डाभाववान् पुरुष इत्यादिनिश्चयप्रतिबध्यत्वमिति ध्येयम्।

(१). घटादेर्भूतलत्वादिधर्म्मितावच्छेदकत्वप्रसङ्गादित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तापि विलक्षणविषयता तन्निरूपकदण्डादिनिष्ठप्रकारताविशेष-शालिनि बोधे विशेषणतावच्छेदकरक्तत्वादिप्रकारकज्ञानापेक्षा; प्रत्येकोपस्थितिमूलकं रक्तदण्डवानित्यादिज्ञानञ्च न तथाविधविल-क्षणप्रकारताशालीति वदन्ति। तदुभयमपि न सम्यगिव प्रतिभाति, विशिष्टज्ञानपूर्व्वक-तदपूर्व्वकयोरविलक्षणाकारकज्ञानयोर्विषयभेद-मन्तरेण विषयतावैलक्षण्यस्याननुभवात्। विशिष्टज्ञानकार्य्यताव-च्छेदकतया तत्सिद्धिरित्यपि बालप्रलपितं तादृशविलक्षणविषयता-सिद्धावेव तन्नियामकतया विशिष्टज्ञानहेतुतासिद्धेः। यदि च विशिष्टप्रतियोगिकविलक्षणसंसर्गावगाहिनि बोधएवान्वय-व्यति-रेकाभ्यां विशिष्टज्ञानं हेतुः तज्जन्यतावच्छेदकं यदि विशिष्टप्रति-योगिकत्वावच्छिन्नसंसर्गताकबुद्धित्वं तदा गौरवम् उक्तवैलक्षण्य-पुरस्कारेण प्रकारताविशेषस्य कार्य्यतावच्छेदकत्वे च लाघवमिति विशिष्टप्रतियोगिकवैशिष्ट्यावगाहिन्येव ज्ञाने प्रकारताया व्यासज्य-वृत्तित्वादिरूपवैलक्षण्यसिद्धिरप्रत्यूहैव इत्युच्यते तदा न विवदामहे-इति प्रकृतमनुसरामः। ननु यथा विशेषणतावच्छेदकरक्तत्वाद्यंशे निर्द्धर्म्मितावच्छेदककतद्विशिष्टवैशिष्ट्यबोधे तत्प्रकारकज्ञानत्वेनैव हेतुता न तु तत्र संशयान्यत्वनिवेशः तथा तदंशे सधर्म्मितावच्छे-दककविशिष्टवैशिष्ट्यबोधेऽपि तद्धर्म्मितावच्छेदकावच्छिन्नविशेष्य-कतत्प्रकारकज्ञानत्वेनैव संशयसाधारणहेतुता स्वीक्रियते निश्चयत्वेन विशेषणतावच्छेदकधीहेतुताया मणिकारादिभिरनभिधानादिति-कथमतिव्याप्तिरतस्तथा हेतुतामनुभवेन द्रढ़यति, 'दण्डो रक्तो न वेति। ननु दण्डो रक्तो न वेति संशयानन्तरं रक्तदण्डवानिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निश्चयानुत्पाद एवानुभवसिद्धः स च (१) विशेषणसन्देहे विशिष्टसन्देहस्य औचित्यावर्ज्जितत्वादुपपद्यते निश्चयोत्पत्तौ संशयसामग्रभावस्यापेक्षितत्वात् रक्तदण्डवान्नवेति विशिष्टसंशयस्त्वनुभवसिद्ध एवेति निश्चयत्वेन हेतुतायां साधकविरहः बाधकस्य च सत्त्वम्।

अत्र केचित्। यदि विशेषणतावच्छेदकप्रकारकसंशयादपि विशिष्टवैशिष्ट्यबोध उपेयते तदा अप्रामाण्यशङ्कास्कन्दितादपि ज्ञानात्तदुपगम आवश्यकः ज्ञानाप्रामाण्यसन्देहेन विषयसंशयस्यापि जननात् संशयेऽप्रामाण्यसंशयस्याकिञ्चित्करत्वात् अतोऽप्रामाण्यनिश्चयास्कन्दितज्ञानात् फलवारणाय अप्रामाण्यनिश्चयानास्कन्दितत्वेनैव हेतुता वक्तव्येति अप्रामाण्यज्ञानीयगुरुशरीरनिश्चयत्वनिवेशात् गौरवं इत्यप्रामाण्यज्ञानानानास्कन्दितनिश्चयत्वन हेतुत्वमेवोचितम् विशेषणसंशयाद्विशिष्टसंशयानुपपत्तिरूपबाधकमपि कथञ्चिदुद्धरणीयमिति (२) वदन्ति।

वस्तुतस्तु संशयस्य विशिष्टवैशिष्ट्यबोधजनकत्वे दण्डो रक्तो न वेति संशयात् रक्तत्व-तदभावाद्युभयविशिष्टदण्डादिवैशिष्ट्यावगाहिबोधोपि (३) स्यात्, न चेष्टापत्तिः, तादृशज्ञानस्य एकत्र दण्डादिधर्म्मिणि विरुद्धोभयप्रकारकतया रक्तत्वादिनिश्चयत्वासम्भवात् विशेष्यान्तरविशेषणतापन्नधर्म्मिकसंशयस्य चानुभवविरुद्धतया तत्र

(१) तादृशनिश्चयानुत्पादश्चेत्यर्थः।

(२) उद्धरणप्रकारश्चानुपदमेव स्वयं दर्शयिष्यति।

(३) रक्तारक्तदण्डवान् पुरुष इति बोधोऽपीत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संशयत्वोपगमासम्भवाच्च। अतएव च केवलं विशेष्ये विशेषणमित्यादिरीत्या रक्तदण्डवानित्यादिज्ञानेऽपि उक्तसंशयः कार्य्यसहभावेनैव प्रतिबन्धक इति वदन्ति। न च तत्र संशयस्य प्रतिबन्धकत्वे विशिष्टवैशिष्ट्यबोधसाधारण एव तत्प्रतिबध्यतावच्छेदकोऽस्तु तावतैव संशयानन्तरं तद्विशिष्टवैशिष्ट्यबोधवारणे तत्प्रकारकज्ञानत्वेनैव हेतुत्वमुचितमिति वाच्यम्। तत्संशयद्वितीयक्षणे कथञ्चित् तत्प्रकारकनिश्चये तद्द्वितीयक्षणे तद्विशिष्टवैशिष्ट्यधीनिर्व्वाहाय विशिष्टवैशिष्ट्यविषयताभिन्नवैशिष्ट्यविषयताया एव संशयप्रतिबध्यतावच्छेदकत्वं वाच्यमिति निश्चयत्वेन विशिष्टवैशिष्ट्यबोधाहेतुत्वे संशयोत्तरं विनापि निश्चयं विशिष्टवैशिष्ट्यधीप्रसङ्गात्। न च यत्र दण्डे रक्तत्वस्य संशयः पुरुषे च दण्डस्यानुमितिसामग्री रक्तेतरदण्डस्य पुरुषे बाधग्रहः तत्र संशयसत्त्वेपि केवलं विशेष्ये विशेषणमिति रीत्या रक्तदण्डवान् पुरुष इत्यनुमित्युत्पत्तेः कथं तादृशबोधे संशयप्रतिबन्धकतेति वाच्यम्। प्रत्यक्षं प्रत्येव तत्प्रतिबन्धकताया वक्तव्यत्वात्, अलौकिकत्वमपि तत्र विशेषणं देयं संशयसत्त्वेऽपि लौकिकसन्निकर्षाद्रक्तदण्डवानिति ज्ञानोत्पत्तेः, लौकिकप्रत्यक्षसामग्र्या विपरीतभानविरोधितयैव च विशेषणधर्म्मिकलौकिकप्रत्यक्षात्मकसंशयस्य नापत्तिः। एवञ्च विशिष्टवैशिष्ट्यबोधव्यावर्त्तकविशेषणानवच्छिन्नेऽपि विशेष्ये विशेषणमिति रीत्या बोधे विशेषणे तद्विशेषणसंशयस्य प्रतिबन्धकत्वेपि दण्डो रक्तो न वेति संशयबलादितरबाधाद्युपनीतरक्तत्वादिविशेषितदण्डाद्यनुमितौ रक्तत्वादिविशिष्टवैशिष्ट्यावगाहिताप्रसङ्गस्य तादृशसंशयानन्तरजात-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रक्तत्वादिविशेषितदण्डादिप्रकारकलौकिकप्रत्यक्षे विशिष्टवैशिष्ट्या-वगाहिताप्रसङ्गस्य च वारणाय तदवगाहिबुद्धौ विशेषणतावच्छेदक-प्रकारकनिश्चयत्वेन हेतुताकल्पनमावश्यकम्।

यत्तु निश्चयत्वेन विशिष्टवैशिष्ट्यबोधहेतुत्वे निश्चयत्वघट-कयोस्तदभावाप्रकारकत्व-तत्प्रकारत्वयोर्दलयोर्विशेष्य-विशेषणभावे विनिगमनाभावेन कारणताबाहुल्यमिति तदभावप्रकारकज्ञान-त्वेन संशयस्य प्रतिबन्धकत्वमेव कल्पयितुमुचितम् (१)। यत्र संशयद्वितीयक्षणे स्मरणादिरूपस्तन्निश्चयस्तत्र द्वितीयक्षणे संशय-नाशे सत्येव विशिष्टवैशिष्ट्यबोध उपेयत इति, तदसत्, तथा सति तुल्ययुक्त्या अनुमित्यादावपि लिङ्गादिसन्देहस्य तदभाव-प्रकारकज्ञानत्वेन प्रतिबन्धकतापातात् निश्चयत्वावच्छिन्नहेतुता-घटितानुमितिलक्षणेऽसम्भवापत्तेः।

यत्तु विशिष्टवैशिष्ट्यबोधं प्रति निश्चयत्वेन हेतुत्वे विशेषण-संशयजन्यविशिष्टसंशयानुपपत्तिरिति बाधकं, तदकिञ्चित्करम्। दण्डत्वसामानाधिकरण्येन रक्तत्वनिश्चयरूपकोटितावच्छेदकाव-च्छिन्नप्रसिद्धिस्थल एव चैत्रीयो दण्डो रक्तो न वेति विशेषरूपाव-च्छेदेन रक्तत्वाभावावगाहिसंशयाद्रक्तदण्डवान्न वा चैत्र इति विशिष्टसंशयोदयात् तथाविधनिश्चयस्य तादृशसंशयाविरोधित्वात्।

यत्तु तत्र विशेष्ये विशेषणमितिरीत्यैव विशिष्टकोट्यवगाही

---

(१) तथाच व्याप्यप्रकारकज्ञानत्वेन कारणत्वं व्याप्याभावप्रकारकत्वेन प्रति-बन्धकत्वं न तु गुरुतरकारणताद्वयं कल्प्यमिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संशयः न तु विशिष्टवैशिष्ट्यावगाहीति समाधानं (१), तदसत्, धर्म्मिणि रक्तत्वादिविशेषितदण्डादेरुक्तरीत्या भानसम्भवेऽपि अभावांशे विशिष्टप्रतियोगिनो वैशिष्ट्यभाननियमात् (२) अभावांशे रक्तत्वादिविशिष्टदण्डादिवैशिष्ट्यभानस्यावश्यकत्वात् तदुपपत्ते- र्दर्शितप्रकारं (३) विना असम्भवात्। न च लौकिकप्रत्यक्षएवा- भावांशे तद्धर्म्मविशेषितप्रतियोगिनि प्रकारतया भासमाने तद्वि- शिष्टवैशिष्ट्यावगाहितानियमः इति संशये कोव्योरुपनयादेव भानाद्विशिष्टवैशिष्ट्यानवगाहिभानसम्भव इति वाच्यम्। दण्ड- सामान्याभावस्यैव रक्तत्वाद्युपलक्षितप्रतियोगिकत्वादभावांशे रक्त- त्वादिविशिष्टदण्डादिरूपप्रतियोगिवैशिष्ट्यानवगाहने तादृशसंश- यस्य दण्डादिसामान्याभावावगाहितया दण्डवानयमिति विशिष्य निश्चयदशायां दण्डादौ रक्तत्वादिसंशयाद्विशिष्टसंशयानुपपत्तेरित्य- धिकमन्यत्रानुसन्धेयम्। दण्डो रक्तो न वेत्यादिसंशयानुव्यवसाये च रक्तत्वादिविशिष्टदण्डादिरूपविषयप्रकारेण न ज्ञानभानं किन्तु दण्डादिविशेषणतानापन्नरक्तत्वादिप्रकारकत्वेनैव इति न तदनुपपत्तिरिति सङ्क्षेपः। विशिष्टवैशिष्ट्यबोधं प्रति विशेषण- तावच्छेदकप्रकारकसंशयान्यत्वेनैव हेतुता न तु तादृशसंशयान्य- ज्ञानत्वेनेति संशयान्यत्वविशिष्टज्ञानत्वरूपनिश्चयत्वावच्छिन्नकार-

---

(१) तथाच विशेषणतावच्छेदकनिश्चयं विनैवौचित्यावर्जितसंशयोपपत्तिरिति भावः।

(२) अभावप्रत्ययो हि विशिष्टवैशिष्ट्यबोधमर्य्यादां नातिशेते इति नियमात्।

(३) प्रागुक्तदण्डत्वसामानाधिकरण्येन रक्तत्वनिश्चयेत्यादिरूपप्रकारमित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

णताघटितलक्षणस्य न तत्रातिव्याप्तिरिति समाधत्ते, 'ज्ञानोपरमेपीत्यादिना 'ज्ञानत्वस्याप्रवेशादित्यन्तेन, ज्ञानत्वस्यावच्छेदकगर्भाप्रवेशे हेतुगर्भविशेषणं 'न्यूनवृत्तेरिति, न्यूनवृत्तित्वञ्च अवच्छेद्यत्वाभिमतहेतुताया अव्यापकत्वं, ज्ञानत्वानिवेशेऽनुद्बुद्धसंस्कारात् विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षापत्तिः स्मृतावेवोद्बोधकस्य हेतुतया प्रत्यक्षे तद्विरहस्याकिञ्चित्करत्वात् तेन विनापि ज्ञानेन विशिष्टवैशिष्ट्यप्रत्यक्षजननादिति तु न देश्यं, अगत्या उद्बोधकासमाधानविशिष्टसंस्कारत्वाभावस्यावच्छेदकप्रवेशेन तदापत्तेर्व्वारणीयत्वात्, उद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाहिस्मरणनिर्व्वाहाय संस्कारभेदमुपेक्ष्य विशिष्टसंस्कारत्वाभावानुधावनम् । उद्बोधकसमवहिते संस्कारे च विशेषणाभावाद्विशिष्टसंस्कारत्वाभावः सुलभः । भेदस्याव्याप्यवृत्तित्वे तु उद्बोधकाभावविशिष्टसंस्कारभेद एव निवेश्यः । अतएव ज्ञानत्वाप्रवेशे लाघवासम्भवेन न्यूनवृत्तित्वमेव तदनिवेशप्रयोजकतयाभिहितम् । 'तद्विषयकगुणानां तत्र हेतुत्व इति न्यूनवृत्तिताप्रकाशनाय, 'तद्विषयकगुणानां' विशिष्टविशेषणावगाहिनामिच्छाद्वेष-कृति-संस्काराणाम् । ननु विशिष्टविषयकेच्छादिस्थलेऽपि तज्जनकविशिष्टज्ञानस्यावश्यकत्वात् सर्व्वत्र ज्ञानमेव हेतुः न तु इच्छादिकमित्याशङ्कायां इच्छादेर्व्विशिष्टवैशिष्ट्यबोधहेतुत्वे हेतुमाह, 'ज्ञानोपरमेपीत्यादिना, 'ज्ञानोपरमेपि' इच्छादिजनकविशिष्टज्ञाननाशेपि, 'विशिष्टविषयोपधानेनेति रक्तत्वादिविशिष्टदण्डादिरूपविषयप्रकारेणेत्यर्थः, 'इच्छा-द्वेषयोः' 'साक्षात्कारादित्यन्वयः, रक्तदण्डमिच्छामि रक्तदण्डं द्वेष्मि इत्याकारक इच्छा-द्वेष-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साक्षात्कार इच्छात्वादिप्रकारक इच्छाद्वितीयक्षणोत्पन्नेच्छात्वादि-निर्व्विकल्पकादिच्छातृतीयक्षण एव उत्पत्स्यते तत्पूर्व्वक्षण एव इच्छाजनकज्ञानं नश्यतीति न विशिष्टवैशिष्ट्यावगाहीच्छाप्रत्यक्षा-व्यवहितप्राक्क्षणे ज्ञानसत्त्वमिति इच्छादिकमेव तत्र हेतुः। यदि च इच्छात्वादिनिर्व्विकल्पकेऽपि विशिष्टविषयप्रकारेण इच्छादिकं भासते तथाच तदेव निर्व्विकल्पकं इच्छांशे विशिष्टवैशिष्ट्यबोधात्मकं इच्छासाक्षात्कारपूर्व्वं स्थास्यतीति तादृशज्ञानस्य न व्यभिचारः। अतएव नृसिंहाकारतन्निर्व्विकल्पकं इति सिद्धान्त इत्युच्यते, तदापि यत्र विशिष्टविषयकफलसाधनताज्ञानं प्रथमं तदुत्तरं फलेच्छा तदनन्तरञ्च विशिष्टोपायविषयिनीच्छा तत्रेच्छात्वनिर्व्विकल्पकरूपे विशिष्टविषयकेच्छासाक्षात्कारे एवं द्विष्टसाधनताज्ञानानन्तरं फलद्वेषजन्योपायद्वेषविषयकसाक्षात्कारे च ज्ञानस्य व्यभिचारो दुर्व्वार एव द्विक्षणस्थायिनो ज्ञानस्य तत्पूर्व्वक्षण एव नाशादिति भावः। कृतिसाक्षात्काराव्यवहितपूर्व्वञ्च ज्ञानस्य विनश्यदवस्थ-स्यापि सत्त्वं सम्भावितमपि नेति सूचयितुं स्वातन्त्र्येण कृति-साक्षात्कारे व्यभिचारं दर्शयति, 'कृतेश्चेति, अत्रापि 'विशिष्टविषयो-पधानेनेत्यनुषज्यते। ननु विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुतया विषयज्ञानं विनापि विषयविशिष्टकृत्यादिसाक्षात्कार एव न भवितु-मर्हतीति अगत्या तत्पूर्व्वं विषयस्मरणमेव कल्पनीयं तथाच विशेषण-तावच्छेदकप्रकारकज्ञानत्वावच्छिन्नस्यापि न तत्र व्यभिचार इत्यत आह, 'विशेषणेति, 'ज्ञानोपरमेऽपीत्यनुषज्यते, रक्तत्वादिरूपविशे-षणज्ञाननाशेऽपि रक्तत्वादिविषयकात् रक्तत्वादिविशिष्टदण्डादि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयकसंस्कारादेव तादृशविशिष्टविषयकस्मरणोत्पत्तेरित्यर्थः, तथाच तत्र व्यभिचारभयेन विशेषणज्ञानस्यापि विशेषणविषयकत्वेनैव विशिष्टधीहेतुता वाच्या तथाच विशेषणविषयकत्वादित एव विषयविशेषितकृत्यादिसाक्षात्कारसम्भवात् न ज्ञानापेक्षेति विशिष्टवैशिष्ट्यबुद्धावपि विशिष्टविषयकगुणमात्रस्य हेतुत्वम्, इत्यञ्च विशिष्टवैशिष्ट्यावगाहिसंस्कारात् विशेषणतावच्छेदकप्रकारकज्ञानं विनैव तादृशस्मरणनिर्व्वाहोऽपीति भावः । एवमुपनायकज्ञानस्य सविषयकत्वेन हेतुता अतो न विषयोपनयार्थं ज्ञानापेक्षेति बोध्यम् । अनुद्बुद्धसंस्कारात् उपनीतभानवारणाय ज्ञानप्रत्यासत्तिहेतुतायामविशिष्टसंस्कारभेद एव निवेश्यः न तूद्बोधकासमवधानविशिष्टसंस्कारत्वाभावादिः, उद्बोधकसमवहितसंस्कारादुपनीतभानानुपगमे क्षतिविरहात् । ततः स्मरणोत्पादे क्षणैकविलम्बनेव उपनीतभाननिर्व्वाहात् । न च स्मरणकल्पने गौरवात् विशिष्टसंस्कारत्वाभावनिवेशनमेवोचितमिति वाच्यम् । उद्बोधकानामननुगततया तदभावसहस्रस्य निवेशनीयतया महागौरवात् । लघुरूपेण कारणतासिद्धौ तन्निर्व्वाहकस्मरणकल्पनागौरवस्य फलमुखत्वेनादोषत्वात् । अतएव निर्व्विकल्पकादिस्मरणकल्पनेन विशेषणधियोऽपि विशेषणज्ञानत्वेन हेतुत्वमग्रे व्यवस्थापयिष्यते इदानीन्तु निर्व्विकल्पकस्मृतिर्न सिद्धान्तसिद्धा कृत्यादिसाक्षात्कारश्चान्तरा विषयस्मरणं विनैवानुभवसिद्ध इत्याशयेन विशेषणज्ञानादिहेतुतायां ज्ञानत्वाप्रवेशोऽभ्युपगत इत्यवधेयम् । अनुमितावपि सविषयकत्वमात्रेण न कुतो हेतुत्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मित्याकाङ्क्षायामाह, 'इच्छादित इति व्याप्यवत्पक्षविषयकेच्छादित-इत्यर्थः। ज्ञानस्य चिरान्तरितत्वविरहेण कदाचिदिच्छादेरनु-मित्युत्पादकतायामिष्टापत्तिः सम्भवतीत्याशङ्क्याह, 'संस्काराच्चेति व्याप्यविशिष्टपक्षविषयकसंस्काराच्चेत्यर्थः। ननु विशिष्टवैशिष्ट्य-बोधहेतुतायामनुद्बुद्धसंस्कारान्यत्ववत् अनुमितिहेतुतायामपि ज्ञानत्वमुपेक्ष्य संस्कारस्य इच्छादेश्च व्यावर्त्तनाय तदन्यत्वमेव किं न निवेश्यते इति तटस्थप्रश्ने उत्तरयति, 'संस्काराद्यन्यत्वस्येति, अगत्या तु विशेषणतावच्छेदकप्रकारकगुणहेतुतायां गौरवसहिष्णु-तेति भावः। अतिव्याप्तिशङ्कया 'संस्काराद्यन्यत्वस्येत्यादिग्रन्थो नावतरति संस्काराद्यन्यत्वेनानुमितिहेतुत्वेऽपि उभयत्र एक-रूपेणाहेतुतयाऽतिव्याप्तेरनवकाशात् ज्ञानत्वघटितधर्म्मावच्छिन्न-कारणताघटितलक्षणेऽसम्भवशङ्कानिरासपरोऽयं ग्रन्थः इत्यप्याहुः।

चिन्तामणिदीधितिः।

न च परामर्शानुव्यवसायेऽतिव्याप्तिः, सामान्यतः प्रत्यक्षे विषयत्वेन तत्तद्विषयकप्रत्यक्षे तत्त्वेन कदाचित् ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना तत्र हेतुत्वं न तु यावा-नेव तत्तदितरत्वादिर्विषयनिष्ठो धर्म्मस्तेन तद्विषयत्वेन कार्य्यकारणभावः मैत्रावलोकित-चैत्रनिर्मित-नीलेतर-घटतद्विषयकत्वादिना तत्त्वेऽनन्तकार्य्य-कारणभाव-प्रसङ्गान्मानाभावात् अन्यथोपपत्तेश्च।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गादाधरी विवृतिः ।

परामर्शप्रत्यक्षं प्रति अनुमिताविव परामर्शत्वेन हेतुता परमर्शं विना तत्प्रत्यक्षानुदयादित्यभिमानमूलां परामर्शप्रत्यक्षेऽतिव्याप्तिशङ्कां तत्र तेन रूपेण हेतुतां निराकुर्व्वाणो निरस्यति, 'न चेति, परामर्शादिप्रत्यक्षे साध्यव्याप्यहेतुप्रकारकपक्षविशेष्यकसंशयान्यज्ञानत्वरूपपरामर्शत्वेन हेतुतां निराकर्त्तुं वस्तुगत्या यद्यत्प्रत्यक्षनिरूपितविषयनिष्ठहेतुतावच्छेदकं तन्निर्द्धारयति, 'सामान्यत-इत्यादिना, 'सामान्यतः' प्रत्यक्षत्वरूपसामान्यधर्म्मावच्छिन्ने प्रत्यक्षे, 'विषयत्वेनेति, विषयतायाः स्वाश्रयविषयादिभेदेन भिन्नत्वेऽपि विषयतात्वमनुगमकं, कारणस्य प्रत्यासत्तिस्तादात्म्यं, कार्य्यस्य लौकिसन्निकर्षजन्यज्ञानीयविलक्षणविषयता (१), अतएवातीतादिविषयस्य न पत्यक्षविषयत्वं कार्य्याव्यवहितपूर्व्ववर्त्तिविषयरूपकारणस्य च तत्र तादात्म्येनासम्बद्धत्वात् । अव्यवहितप्राक्क्षणवृत्तिकारणसम्बन्धस्य कार्य्यसम्बन्धप्रयोजकत्वात्, अतीतानागतघटादिरूपविषये कार्य्याव्यवहितप्राक्क्षणवृत्तिचक्षुःसंयोगादेरसत्त्वेऽपि अतीतानागतशब्द-रूपादिविषयविशेषादौ इन्द्रियसमवाय-तत्संयुक्तसमवाययोः सत्त्वेन तत्र प्रत्यक्षस्य विषयतयोत्पत्तिवारणाय विषयस्य हेतुत्वमावश्यकम् । यदि चाव्यवहितप्राक्क्षणावच्छिन्नः कारणसम्बन्धः कार्य्योत्पत्तिप्रयोजकः, न तु तादृशक्षणवृत्तित्वोपलक्षितकारणस्यापि सम्बन्धः, तत्क्षणे प्रतिबन्धकसमवहितस्यापि

(१) विलक्षणविषयतायाः कार्य्यतावच्छेदकसंसर्गत्वादेव नालौकिकप्रत्यक्षे व्यभिचारः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देशस्यान्यदेशावच्छेदेन तत्क्षणवृत्तिप्रतिबन्धकात्यन्ताभावस्यान्यकालावच्छेदेनाधिकरणतया तत्र च द्वितीयक्षणे कार्य्यापत्तेः। एवञ्चातीतादिविषयस्य वर्त्तमानकालासम्बन्धितया अवच्छेद्याधिकरणसम्बद्धस्यैवावच्छेदकतया नित्यस्यापि सन्निकर्षस्य वर्त्तमानकालावच्छेदेन न तत्र सत्त्वमिति नातिप्रसङ्गः। अथैवं अतीतादौ विषये सामान्यप्रत्यासत्त्यापि न प्रत्यक्षं जायेत तत्र वर्त्तमानकालावच्छेदेन नित्यस्यापि सामान्यस्यासत्त्वादिति चेन्न, कारणताघटकं हि व्यापकत्वं द्विधा, क्वचित् यत्र यदा कार्य्यं तत्र तदव्यवहितप्राक्क्षणावच्छेदेन कारणमित्येवं रूपं, क्वचिच्च यत्र यदा कार्य्यं तत्र तदव्यवहितप्राक्क्षणवृत्तिकारणमित्येवं रूपं, यत्र यस्य कारणता प्रथमोक्तव्यापकताघटिता तस्य प्राक्क्षणावच्छेदेन देशे सत्त्वं, यस्य कारणता द्वितीयव्यापकताघटिता प्राक्क्षणवृत्तेस्तस्य यदा कदाचिद्देशे सत्त्वं देशे कार्य्योत्पत्तिप्रयोजकम्। लौकिकसन्निकर्षादेः प्रत्यक्षादिहेतुतायाञ्च प्रथमव्यापकत्वं, सामान्यप्रत्यासत्त्यादेः तद्धेतुतायाञ्च द्वितीयमिति नातीतादिविषयस्य लौकिकप्रत्यक्षप्रसङ्गो न वा सामान्यजप्रत्यक्षानुपपत्तिरित्युच्यते, तदापि पूर्व्वक्षणावच्छिन्नसन्निकर्षाद्विषयनाशकाले तत्प्रत्यक्षापत्तिवारणाय विषयस्य कार्य्यसहभावेन हेतुत्वमावश्यकम्। यदि च विषयनाशोत्पत्तिकालेऽपि प्रत्यक्षमिष्यते "सम्बद्धं वर्त्तमानञ्च गृह्यते चक्षुरादिना"। इति प्रवादस्तु प्राक्क्षणवर्त्तमानतापरः। अतएवाशुविनाशिसुखादिप्रकारकलौकिकप्रत्यक्षस्य सुखाद्युत्पादतृतीयक्षणे निर्व्वाहः। विशेषणज्ञानस्य हेतुतया तदुत्पत्तिक्षणे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्विरहेण द्वितीयक्षणे तद्विशिष्टबुद्ध्यसम्भवात् इत्युच्यते, तदापि प्रत्यक्षविशेषे विषयविशेषस्य हेतुतया व्यवस्थापनीयतया यद्विशेषे यद्विशेषस्य प्रयोजकता तत्सामान्ये तत्सामान्यस्येति नियमात् सामान्यकार्य्य-कारणभाव आवश्यकः। 'तत्तद्विषयकेति तत्तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुतेत्यर्थः। न चैतादृशकार्य्य-कारणभावो निष्प्रमाणकः तत्तद्व्यक्ति-विषयकप्रत्यक्षस्य सन्निकर्षादिशालिव्यक्त्यन्तरे इष्टत्वात् यावतीषु व्यक्तिषु सन्निकर्षादिघटितसामग्रीसमवधानं युगपत्तावद्विषयस्य एकस्यैव प्रत्यक्षस्योत्पत्तेरिति वाच्यम्। तत्तद्व्यक्तिभेदेन इन्द्रियसन्निकर्षादिघटितसामग्रीभेदनिर्वाहाय तत्तद्व्यक्तित्वेन विषय-हेतुताया आवश्यकत्वात्, अन्यथा तत्तद्घटेन्द्रियसन्निकर्षादीनां साधारणधर्म्मपुरस्कारेणैव(१) हेतुतया तद्व्यक्तिभासकसामग्र्या एतद्व्यक्तिभासकसामग्रीतो वैलक्षण्यासम्भवात् तादृशहेतुतासत्त्वे तादृशसामग्र्याः पृथक् तत्तद्व्यक्तित्वावच्छिन्नघटितत्वेन वैलक्षण्यात्, तदवैलक्षण्ये च तत्तद्व्यक्तिविषयकबाधग्रहाभावादिघटितायाः समवायेन तत्तद्व्यक्तिविषयकविशिष्टप्रत्यक्षसामग्र्या विषयतासम्बन्धेन तत्तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीमत्क्षणवृत्तित्वविशिष्टायाः समवायेन तत्तद्व्यक्तिविषयकविशिष्टबुद्ध्युत्पादप्रयोजिकायाः व्यक्त्यन्तरमात्रसन्निकर्षदशायामपि आत्मन्यक्षतत्वेन तदानीमात्मनि समवायेन तादृशबुद्ध्यापत्तेर्दुर्व्वारत्वात्। न च सन्निकर्षस्यैव तत्तद्व्यक्ति-

(१) संयोगत्वादिनेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सन्निकर्षत्वेन हेतुत्वमस्तु तावताप्यन्यव्यक्तिमात्रसन्निकर्षवत्यपि काले विषयतया तत्तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीविरहः सुघटः तदानीं तादृशतद्व्यक्तिसन्निकर्षाभावादिति वाच्यम्। गुरुणा तत्तद्व्यक्तिसन्निकर्षत्वेनैव हेतुतापेक्षया लाघवात् तत्तद्व्यक्तित्वेन विषयहेतुताया एवोचितत्वात्। न चोक्तकाले तत्तद्व्यक्तित्वावच्छिन्नस्य विषयस्य सत्त्वेन तद्घटितसामग्र्यक्षतैव इति न विषयतया तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीविरह इति विशिष्य विषयहेतुतया नोक्तातिप्रसङ्गवारणसम्भव इति वाच्यम्। एकाधिकरणप्रत्यासन्नकारणतावच्छेदकावच्छिन्नस्तोमस्यैव सामग्रीत्वात् तादात्म्यसम्बन्धेन तत्तद्व्यक्तित्वावच्छिन्नसम्बन्धिन्यां तत्तद्व्यक्तौ समवायादिना अप्रत्यासन्नस्य इन्द्रियसंयोगादेः सत्त्वेऽपि उक्तसामग्रीविरहात्। यदि च तद्धर्म्मघटितधर्म्मावच्छिन्नजनकसामग्री तद्धर्म्मवत्ताप्रयोजकसामग्रीसमवहिता कार्य्यं जनयति अत आत्मनि तद्व्यक्तिविषयकज्ञानजनकसामग्र्यास्तद्विषयकत्वप्रयोजकसमवधानमपेक्षणीयं प्रत्यक्षे तद्व्यक्तिविषयत्वप्रयोजकत्वञ्च तद्विषयतानियामकसामग्र्यास्तद्व्यक्तित्वसामानाधिकरण्यम्, उक्तस्थले च इन्द्रियसन्निकर्षादौ तदभावात् तत्तद्व्यक्तित्वेन तत्तत्प्रत्यक्षाहेतुत्वेऽपि नोक्तापत्तिरित्युच्यते, तदापि तत्तद्घटादिव्यक्तिवृत्तितद्रूपाद्यात्मकविशेषणधीघटिता सामग्री तद्विशिष्टबुद्धिजनने तत्तद्घटादिस्वरूपविशेष्यभासकसामग्रीसापेक्षा वाच्या व्यक्त्यन्तरभासकसन्निकर्षादिघटितसामग्रीतस्तद्व्यक्तिभासकसामग्र्या अविशेषे च व्यक्त्यन्तरमात्रसन्निकर्षदशायामपि तद्व्यक्तिगतरूपादिज्ञानात् तद्विशिष्टबुद्ध्यापत्ति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्दुर्व्वारैव, (१) न हि तद्रूपादिज्ञानजन्यतावच्छेदकगर्भे तद्घटादि-व्यक्तिविषयकत्वमपि प्रविष्टं, येनोक्तप्रयोजकापेक्षया नातिप्रसङ्गः स्यात्, तथा सति (२) तत्प्रकारकभ्रमाद्यसंग्रहप्रसङ्गादिति तत्त-द्व्यक्तित्वेन विषयस्य हेतुत्वमावश्यकं तद्व्यक्तिविषयकत्वरूपकार्य्य-तावच्छेदकोपलक्षितप्रत्यक्षस्य समूहालम्बनरूपस्य विषयतासम्ब-न्धेन व्यक्त्यन्तरेषूत्पत्तावपि तद्विशिष्टस्यानुत्पत्तेः न तद्व्यक्तित्वाव-च्छिन्नहेतुतायां व्यभिचारः, तादृशकार्य्यतावच्छेदकविशिष्टसमा-नाधिकरणाभावघटितव्यापकताया अक्षतत्वात्, तत्तद्व्यक्तिवृत्ति-विषयतात्वेनैव कार्य्यतावच्छेदकसम्बन्धत्वोपगमात् न व्यभिचार इत्यप्याहुः ।

ननु परामर्शत्व-परामर्शप्रत्यक्षत्वयोरतिसामान्यातिविशेषोक्त-रूपवहिर्भावेऽपि (३) मध्यविधकार्य्य-कारणभावस्तेन रूपेणापि(४) इतिशङ्कामपाकर्त्तुं मध्यविधकार्य्यकारणभावस्य प्रामाणिकत्वे तद-वच्छेदकं विशिष्टानात्मकं लघुरूपं दर्शयति, 'कदाचिदिति, तादृशकार्य्य-कारणभावस्य निर्युक्तित्वं 'कदाचिदित्यनेन सूचितम् ।

---

(१) न च तद्व्यक्त्यन्तरे तद्विशिष्टबुद्धिर्भ्रमरूपैव सा च न जायते दोषाभावात् दोषसत्त्वे इष्टापत्तिरिति वाच्यम् । दोषाद्यघटितयादृशसामग्रीबलात् तद्घट-व्यक्तौ तद्रूपविशिष्टबुद्धिर्जायते तादृशसामग्र्या एव व्यक्त्यन्तरे सत्त्वेन दोषासत्त्वेपि व्यक्त्यन्तरे तद्विशिष्टबुद्ध्यापत्तिर्दुर्व्वारैवेति ।

(२) तत्तद्व्यक्तिविषयकत्वस्य कार्य्यतावच्छेदके प्रवेशे ।

(३) प्रत्यक्षत्व-विषयत्व-तत्तद्व्यक्तिविषयकप्रत्यक्षत्व-तत्तद्व्यक्तित्वरूपेणेत्यर्थः ।

(४) परामर्शत्व-परामर्शप्रत्यक्षत्वरूपेणेत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यद्यप्यतीन्द्रियानां (१) गुरुत्वादृष्ट-भावना-स्थितिस्थापकानां प्रत्यक्षस्य चक्षुराद्ययोग्यस्पर्शादीनाञ्च चक्षुरादिना ग्रहस्य च वारणाय योग्यजातीयानां स्वविषयकप्रत्यक्षे हेतुत्वकल्पनमावश्यकं, तथा सति यावद्विशेषकारणबाधेनातीन्द्रियविषयतया प्रत्यक्ष-वारणसम्भवात्, (२) तथाप्यादिपदग्राह्यघटादिप्रत्यक्ष-घटत्वादिना कार्य्य-कारणभावोऽतिनिर्युक्तिकएव। वस्तुतस्त्वतीन्द्रियविषयाणां तादात्म्येन प्रतिबन्धकत्वकल्पनयैवातिप्रसङ्गवारणे योग्यजातीयानां बहूनां न प्रत्यक्षहेतुता अन्यत् स्वयमूहनीयम्। इदानीं प्रतिबन्धिं प्रदर्शयन् परामर्शप्रत्यक्षे परामर्शत्वेन हेतुतां निरा-करोति 'न त्विति, 'तत्तदितरत्वादिरिति व्याप्तिप्रकारकत्व-पक्षधर्म्मताविषकत्व-ज्ञानत्व-संशयेतरत्वादिघटित इत्यर्थः, 'घट-तद्विषयत्वादिना' घटत्व-तत्प्रत्यक्षत्वादिना, प्रामाणिकत्वे गौरवं न दोषायेत्यत आह, 'मानाभावादिति। ननु परामर्शादिशून्य-काले तद्विषयकप्रत्यक्षत्वावच्छिन्नापत्तिवारणान्यथानुपपत्त्या परा-

---

(१) नित्यसन्निकर्षाश्रयीभूतातीन्द्रियपदार्थस्य प्रत्यक्षवारणाय योग्यजातीयानां स्वविषयकप्रत्यक्षं प्रति हेतुत्वमावश्यकं तथा सति कदाचिदित्यसङ्गतं इत्याशङ्क्य नित्यसन्निकर्षाश्रययोग्यजातीयानां स्वविषयकप्रत्यक्षं प्रति हेतुत्वेऽपि आदिपदगृहीतस्य अनित्यसन्निकर्षाश्रययोग्यघटादिजातीयानां स्वविषयकप्रत्यक्षं प्रति हेतुत्वस्य निर्युक्तिकत्वं कदाचिदित्यनेन सूचितं इति समाधत्ते, यद्यपीत्यादिना। नन्वेतावता आदिपदगृहीतस्य कार्य्य-कारणभावस्य निर्युक्तिकत्वेऽपि प्रकृतशब्दलभ्यकार्य्य-कारणतावस्य निर्युक्तिकत्वं नायातीत्याशयेनाह, वस्तुतस्त्वित्यादि।

(२) सामान्यसामग्रा उभयवृत्तिधर्म्मघटितविशेषसामग्रसमवहितायाः फलाजनकत्वनियमादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मर्शादिप्रत्यक्षे परामर्शत्वादिना कारणत्वकल्पनमावश्यकमित्यत आह, 'अन्यथोपपत्तेश्चेति प्रत्यक्षविषयताप्रयोजिकाया विषयतासम्बन्धेन प्रत्यक्षोत्पादकसामग्र्या विषयनिष्ठतत्तद्धर्म्मसामानाधिकरण्यरूपात् प्रत्यक्षविषयतायास्तत्तद्धर्म्मसामानाधिकरण्यप्रयोजकादेव तत्तद्धर्म्मवद्वृत्तिविषयताकप्रत्यक्षत्वावच्छिन्नोत्पत्तिनियमोपपत्तेरित्यर्थः। अतएव प्रयोजकसमाजनियम्यधर्म्मान्तराणामपि न कार्य्यतावच्छेदकत्वमिति भावः।

चिन्तामणिदीधितिः।

अथ विशिष्टस्मरणेऽतिव्याप्तिः। न चोपेक्षान्यत्वेन तत्र हेतुत्वं, उपेक्षात्वं हि न जातिश्चाक्षुषत्वादिना सङ्करप्रसङ्गात् आंशिकत्वोपगमाच्च।

गादाधरी विवृतिः।

वह्निव्याप्यधूमवान् पर्व्वत इति स्मरणे तादृशनिश्चयत्वेन हेतुत्वात्तत्रातिव्याप्तिरिति शङ्कते, 'अथेति, 'विशिष्टस्मरणे' व्याप्यविशिष्टपक्षस्मरणे। न च स्मृतिजनकतायामप्रामाण्यज्ञानाभाववैशिष्ट्यानिवेशादनुमितौ च तन्निवेशान्नैकरूपेण उभयहेतुतेति नातिव्याप्तिरिति वाच्यम्। अनुमितिजनकतायामप्रामाण्यज्ञानाभावनिवेशे विशेष्य-विशेषणभावे विनिगमनाविरहादप्रामाण्यज्ञानाभावस्य पृथक्कारणत्वोपगमात्। अथ धूमत्वादिना एकधूमादिविषयकज्ञानात् तेन रूपेण धूमाद्यन्तरस्मरणवारणाय तत्तद्धूमादिव्यक्त्यवगाहित्वमपि स्मृतिजनकतावच्छेदके प्रविष्टं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न त्वनुमितिजनकतावच्छेदकतायामिति कथमवच्छेदकतापर्य्याप्ति-घटितलक्षणेऽतिव्याप्तिः। न च पर्य्याप्त्यनिवेशाभिप्रायेणैतदभिधानं, 'न चोपेक्षान्यत्वेनेति शङ्कानवतारात्। न च समानविशेष्यत्वप्रत्यासत्त्यैवानतिप्रसङ्गे तत्तद्व्यक्तिविषयकत्वस्य न स्मृतिजनकतायां निवेश इति वाच्यम्। वह्निव्याप्यधूमत्वादिनान्यविषयकाद्रूपान्तरेण चेतद्धूमावगाहिज्ञानाद्वह्निव्याप्यधूमत्वादिनैतद्धूमादिविषयकस्मरणस्य समानविशेष्यताप्रत्यासत्त्या अवारणात् वह्निव्याप्यधूमत्वादिप्रकारकविषयतात्वेन विषयतायाः कार्य्य-कारणसम्बन्धत्वोपगमे कारणतावच्छेदकधर्म्मगर्भे व्याप्त्यादिविषयताया निवेशे प्रयोजनविरहेण तद्रूपावच्छिन्नजनकताघटितोक्तलक्षणस्यातिव्याप्त्यनवकाशः उक्तविषयतायाः सम्बन्धत्वेऽपि अभावत्वादिना अभावान्तरस्य व्याप्तिशरीरे यत्र भानं तत्रापराभावादिविषयकस्मरणापत्तिर्दुर्व्वारैवेति तत्तद्व्यक्तिविषयतात्वेनैवाभावत्वाद्यवच्छिन्नविषयताः स्मृतिजनकतायां निवेशनीया न त्वनुमितिजनकतायामित्यतिव्याप्तिर्न सङ्गतैवेति चेन्न, यत्साध्यव्याप्ययद्धेतुविशिष्टयद्धर्म्मिविषयकं सर्व्वमेव ज्ञानं तत्तद्धर्म्मप्रकारेण तद्धर्म्माश्रयाशेषव्यक्तिविषयकं तत्साध्यव्याप्यतद्धेतुविशिष्टतद्धर्म्मिज्ञानस्य तादृशस्मृतिहेतुतायां तत्तद्धर्म्मिविषयकत्वस्याव्यावर्त्तकत्वेनानिवेशात् तादृशपरामर्शघटितलक्षणाभिप्रायेणैतदभिधानात् जातिघटितलक्षणस्य इदानीमकरणात्। न च तादृशस्थलेऽपि नानासाधनादिप्रकारेण नानाधिकरणाद्यवगाहिज्ञानस्य यद्यदधिकरणादेर्यद्यत्साधनादिप्रकारेण तद्विषयता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्तत्साधनादिव्यक्तिभिन्नतत्तद्विषयसाधनादिप्रकारेण तद्विषयाधिकरणादिरूत्यन्तरविषहकस्मरणापत्तिर्दुर्व्वारैवेति तत्तद्व्यक्तिप्रकारतानिरूपिततत्तद्व्यक्तिविशेष्यतानां विशिष्य कार्य्य-कारणभावे निवेशनमावश्यकमिति वाच्यम् । तत्स्थलीयपरामर्शस्य तत्स्मरणनिष्ठकार्य्यतावच्छेदकगर्भे तत्तत्साधनादिव्यक्तिप्रकारतानिरूपिततत्तत्साधनाधिकरणव्यक्तिविषयतानां विशिष्टनिवेशादेव स्मृतौ वैपरीत्येन भानवारणात् कारणतावच्छेदककोठौ तत्तद्व्यक्तिविषयतात्वेन विषयतानिवेशे प्रयोजनविरहात् तावतैव च शङ्कितातिव्याप्तिसङ्गतिः ।

परे तु यद्युपमितिविशेषेऽतिव्याप्तिवारणाय कारणतावच्छेदकत्वपर्य्याप्तिः परामर्शत्वांशे निवेशनमावश्यकमिति मन्यते तदापि परामर्शत्वशरीरे या या विषयताः प्रविष्टास्तदन्यविषयत्वानवच्छिन्नत्वरूपं परामर्शत्वपर्य्याप्तावच्छेदकताकत्वमेव लक्षणप्रविष्टकारणतायां निवेश्यं लाघवान्न तु परामर्शत्वघटकायावन्तः पदार्थास्तदन्यपदार्थानवच्छिन्नत्वम् अधिकभेदनिवेशे गौरवात्, एवञ्चोपमितिविशेषे हेतुतावच्छेदकेऽधिकविषयतानिवेशादेव नातिव्याप्त्यवकाशः, स्मृतिकारणतावच्छेदके च तत्तद्विषयाणामधिकानां निवेशेऽप्यधिकविषयतानामनिवेशात्तत्रातिव्याप्तिशङ्कासङ्गतिः । अतिरिक्तविषयतानवच्छिन्नत्ववत् उपेक्षान्यत्वानवच्छिन्नत्वमपि निवेश्यमित्याशयमूलायाः शङ्कायाः 'न चेत्यादिना निरास इत्याहुः ।

अथ तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वेन संस्कारहेतुतयैव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मृतेर्विषयनियमे ज्ञानस्य ज्ञानत्वेनैव स्मृतित्वावच्छिन्नं प्रति हेतुता न तु तत्तद्विषयकस्मृतौ तत्तद्विषयकनिश्चयत्वेनेति कथमतिव्याप्तिः। न च तत्संशयात्तत्स्मरणवारणाय तत्स्मृतौ तन्निश्चयत्वेन हेतुत्वमावश्यकमिति वाच्यम्। संस्कारस्य तद्धर्म्मिक-तत्प्रकारकस्मरणे तद्धर्म्मिकतदभावप्रकारकान्यतद्धर्म्मिकतत्प्रकारक-संस्कारत्वेन हेतुतयैव तद्गोचरसंशयात्तदापत्त्ययोगात् संशयजन्य-संस्कारस्य विरोधिप्रकारकत्वनियमादिति चेन्न, संस्कारस्य संस्कार-त्वेनैव हेतुता ज्ञानस्य तत्तद्गोचरस्मृतौ तत्तन्निश्चयत्वेन इत्यस्यापि सम्भवेन विनिगमकाभावात् ज्ञानहेतुतायामपि विषयादिनिवे-शस्याप्रत्याख्येयत्वात्। न च तद्गोचरज्ञानजन्यसंस्कारस्य काला-दिना नाशे अन्यगोचरसंस्कारात्तद्गोचरस्मरणवारणाय संस्कार-हेतुतायां विषयनिवेशनमावश्यकमिति वाच्यम्। संस्कारहेतुतायां विषयानिवेशेप्युक्तस्थले तन्निश्चयरूपकरणव्यापारविरहेण तत्स्मर-णापत्त्यसम्भवात्। वस्तुतोऽन्वय-व्यतिरेकाभ्यां तद्गोचरस्मृतौ तद्गो-चरनिश्चयत्वेन हेतुत्वसिद्धौ तन्निर्व्वाहकतया व्यापारीभूतसंस्कार-कल्पना संस्कारे प्रमाणान्तराभावादिति कथं संस्कारेण तद्गोचर-निश्चयत्वावच्छिन्नस्यान्यथासिद्धिः यतस्तद्रूपावच्छिन्नमहेतुः स्यात्, न हि यदुपजीव्य यत्सिद्ध्यति तत् तद्व्याघातकं, एतेन संस्कारहेतु-तायां विषयानिवेशे तदंशे उपेक्षात्मकज्ञानजन्यादन्यगोचर-संस्कारात् तत्स्मरणापत्तिवारणाय तद्विषयकस्मृतौ तद्विषयक-संस्कारत्वेन हेतुत्वमावश्यकमिति ज्ञानहेतुतायां विषयनिवेशो व्यर्थ इत्यपि प्रत्युक्तम्। फल-व्यापारौ प्रति करणस्य एकरूपेण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतुतेति प्राचीनसम्मतनियमानुरोधेन ज्ञानस्य स्मृतिजनकतायां विषयनिवेशनमावश्यकमित्यपि वदन्ति।

यत्तु ज्ञानस्य ज्ञानत्वेनैव स्मृतिहेतुता तद्विषयकस्मृतावुद्बोधक-विशेषाणां हेतुताया आवश्यकत्वात् तत एव विषयनियमोपपत्तेः उद्बोधकानां फलबलकल्प्यत्वात्। न च सम्बन्धि-पदज्ञानादीनामनुगतरूपेणैव तत्तद्गोचरस्मृतिहेतुतया तद्गोचर-ज्ञानं विनापि तत्स्मरणापत्तिरिति वाच्यम्। तत्सम्बन्धित्वेन गृहीतम् यत्तज्ज्ञानस्यैव तद्विषयस्मारकतया तादृशोद्बोधकसम-वधानस्थले तज्ज्ञानस्याप्यावश्यकत्वादिति, तदसत्, तथा सति ज्ञानत्वमात्रेणापि ज्ञानस्य स्मृतिहेतुतायामप्रामाणिकतापत्तेः। उद्बोधकेन ज्ञानविशेषान्यथासिद्धौ कालान्तरे यज्ज्ञानस्योपयोगिता तज्ज्ञानार्थं विशेषदर्शिनां शास्त्राध्ययनादावप्रवृत्तिप्रसङ्गाच्च।

वस्तुतः (१) स्मृतौ सम्बन्धिज्ञानस्य न तत्सम्बन्धावगाहिज्ञान-त्वेन हेतुता यत्र सम्बन्धो येन रूपेण गृहीतः सम्बन्धाविषयकादपि तत्प्रकारकज्ञानात् सम्बन्ध्यन्तरस्मरणात्, नापि सम्बन्धग्रहविषय-तावच्छेदकावच्छिन्नविषयकत्वेन सम्बन्धग्रहस्य उपलक्षणतया भाविसम्बन्धग्रहविषयविषयकग्रहस्याप्युद्बोधकतापत्तेः, सम्बन्ध-ग्रहे सामान्यतः पूर्व्वत्वमव्यावर्त्तकम् तत्तज्ज्ञानपूर्व्वत्वञ्चाननु-गतं सम्बन्धानुद्बोधे च पूर्व्वसम्बन्धग्रहोप्यस्मारकः सम्बन्धोद्बोधका-अप्यननुगता एव, एवञ्च स्मृत्युपधायकसम्बन्धिज्ञानानां तत्तद्व्यक्ति-

(१) अनुगतत्वेनाभिमता अपि उद्बोधका नानुगता इत्याह वस्तुत इत्यादिना।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वेनैव हेतुता वाच्या तथाच यादृशसम्बन्धिज्ञानसत्त्वे यस्य पुंसो- नियमतोऽनुभूतस्य यद्विषयस्य स्मृतिस्तद्वस्तुज्ञानस्य तत्तद्वयक्तित्वेन नानाहेतुत्वकल्पनामपेक्ष्य तत्तत्पुरुषीयतद्विषकस्मृतौ तद्वस्तुज्ञानत्वे- नानुगतरूपेणैकहेतुतैव कल्पयते यत्पूर्व्वञ्च तद्विषयस्य नानु- भवस्तत्कालीनतद्वस्तुज्ञानात् तस्य तद्विषयस्मृतिवारणाय च तद्गोचरस्मृतौ तद्विषयकनिश्चयत्वेनापि हेतुत्वमावश्यकमितिदिक्। उपेक्षात्मकज्ञानात् स्मरणानुत्पत्त्या तदन्यत्वस्याधिकस्यापि स्मृति- कारणतावच्छेदके निवेश्यतया नोपदर्शितनिश्चयत्वपर्य्याप्तकारण- तावच्छेदकताकत्वं स्मृताविति नातिव्याप्तिरित्याशङ्कां निरस्यति, 'न चेति, 'उपेक्षान्यत्वं' उपेक्षात्वावच्छिन्नभेदः, तस्य तदा स्मृति- कारणतावच्छेदकघटकता स्यात् यद्युपेक्षात्वं स्मृतिजनकधी- व्यावृत्तो जातिविशेषः स्यात्, स्मृत्यजनकज्ञानत्वरूपस्य उपेक्षा- व्यवहारविषयस्य उपाधेः स्मृतिजनकतायां प्रवेशासम्भवात् स्मृत्य- जनकान्यत्वस्य स्मृतिजनकत्वरूपत्वात् स्वस्य (१) च स्वानवच्छेदक- त्वात्, नहि तादृशजातिः शक्यकल्पना, जातिसङ्करादिदोषग्रासात् इत्याह, 'उपेक्षात्वं हीति, अत्र च जातित्वाभावानुमाने उपेक्षात्वस्य स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकत्वेन पक्षता, 'अथे- त्यादिशङ्कितुर्मतेऽपि स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छे- दकत्वस्य संशयत्वे तद्घटकविरोधिप्रकारकत्वे वा प्रसिद्धत्वात्। तत्र जातित्वाभावस्य उभयमतसिद्धत्वेऽपि उक्तपक्षतावच्छेदकावच्छेदेन

---

(१) आत्माश्रयप्रसङ्गभयेनेत्यादिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यसिद्धेरुद्देश्यत्वान्नांशतः सिद्धसाधनं दोषः । अत्र उपेक्षापदप्रवृत्तिनिमित्तत्वेन पक्षता उपेक्षापदप्रवृत्तिनिमित्तस्य प्रसिद्धावपि वादिनस्तस्य स्मृत्यजनकत्वादिरूपतया तदवच्छिन्नान्यत्वस्य स्मृतिजनकत्वावच्छेदकत्वासम्भवेन(१) स्मृतेरनुमितिजनकतावच्छेदकपर्य्याप्तजनकतावच्छेदकताकत्वात्ततः, अत्राप्यवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्नोक्तदोषः इत्यपि केचित्, तच्चिन्त्यम् उपेक्षात्वस्य जातित्ववादिना तस्योपेक्षापदप्रवृत्तिनिमित्ततानभ्युपगमे क्षतिविरहादवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेऽपि तत्र जातित्वाभावासिद्धेः, 'तादृशादपि स्मृत्युत्पादादित्यग्रिमग्रन्थविरोधाच्च । तद्रूपवतः स्मृत्युत्पादकत्वे तद्रूपनिष्ठस्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकताया एव विरोधित्वात् न तु उपेक्षापदप्रवृत्तिनिमित्ततायाः ।

यत्तु स्मृतिजनकावृत्तिज्ञानधर्म्मत्वेन (२) पक्षता, तादृशधर्म्मत्वञ्च तत्तज्ज्ञानान्यतरत्वादौ प्रसिद्धमिति, तदसत्, एकांशे उपेक्षात्मकज्ञानस्यान्यविषयकस्मृतिजनकतया उपेक्षात्वस्य स्मृतिजनकावृत्तित्वाप्रसिद्धेः, अन्यथा 'आंशिकत्वोपगमाच्चेति बाधकासङ्गतेः ।

स्वीययावद्विषयविषयकस्मृतिजनकावृत्तिज्ञानधर्म्मत्वेन तु (३) पक्षत्वं सम्भवति, 'चाक्षुषत्वादिनेति, आदिना ज्ञानत्वव्याप्य-

(१) स्वस्य स्वानवच्छेदकत्वादिति भावः ।
(२) घटत्वादौ व्यभिचारवारणाय ज्ञानेति ।
(३) स्वं अवृत्तिप्रतियोगिनिरूपकपरम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निखिलजातिपरिग्रहः। तत्तज्जातिनिरूपितसङ्करस्य च पृथगेव हेतुता बोध्या न तु मिलितस्य वैयर्थ्यात्। तज्जात्यव्यापकत्वे सति तज्जातिव्यभिचारित्वे सति तज्जातिसामानाधिकरण्यं तत्सङ्करः। अव्यापकत्वं प्रतियोग्यसमानाधिकरणतत्समानाधिकरणाभावप्रतियोगित्वं, तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वं वा, तज्जातिव्यभिचारित्वञ्च तद्वत्त्वावच्छिन्नाभावसामानाधिकरण्यम्। यद्यपि व्याप्यजातिमत्यनित्येऽपि कालिकादिसम्बन्धेन व्यापकजात्यवच्छिन्नभेदोवर्त्तते, व्याप्यजातेरपि व्यापकजातिशून्ये कालिकादिसम्बन्धेन वृत्तेर्विरुद्धजातेरपि कालिकादिसम्बन्धेन सामानाधिकरण्यमस्ति समवायेन चावच्छेदकत्वं वृत्तिश्च पक्षस्योपेक्षात्वस्य नोभयमते, उपेक्षात्वस्य उपाधित्वमते (१) विशेषणताविशेषेणैव वृत्तेरिति स्वरूपासिद्धिः। वस्तुतस्तु (२) गुणगतजातिसङ्करस्य (३) यत्र हेतुता तत्र साधनाप्रसिद्धिरेव गुणे जातिभिन्नस्यासमवायात्, समवायघटितचाक्षुषत्वादिसङ्करस्य क्वचिदपि प्रसिद्धिविरहात्। तथापि समवाय-दैशिकविशेषणतान्यतरसम्बन्धेन तथात्वं (४) बोध्यम्। अथवा समवायेनावच्छेदकत्वस्थाने समवायावच्छिन्नावच्छेदकताशून्यं यत्समवेतं तदन्यत्वं, समवायेन तदभावादिमति समवायेन वृत्तिस्थाने समवायेन तदवृत्तित्वे

---

(१) स्मृत्यजनकत्वरूपोपाधित्वमते।

(२) पृथिवीत्वादिसङ्करस्य घटजलसंयोगादौ प्रसिद्धत्वेऽपि।

(३) गुणगता या जातिश्चाक्षुषत्वादिरूपा तत्सङ्करस्य।

(४) अवच्छेदकत्वादिकमित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सति समवेतं यत्तदन्यत्वं, तज्जातिसमानाधिकरणत्वस्थले तज्जातिमदसमवेतत्वे सति यत्समवेतं तदन्यत्वं च निवेशनीयमिति नासिद्धिः। विशिष्टभेदस्य पक्षस्य समवेतत्वेऽसमवेतत्वे चाक्षतत्वात्। यदि चैतत् निरूपकजातिभेदेन भिन्नमेव तत्तज्जातीनां विशिष्योपादानादिति चाक्षुषत्वादिना सङ्करस्य यत्र हेतुता तत्र व्याप्यजातौ व्यभिचारवारकं व्यभिचारित्वविशेषणं व्यर्थं चाक्षुषत्वादिव्याप्यजात्यप्रसिद्धेः, तत्परित्यागे च ज्ञानत्वाद्यव्यापक-तत्समानाधिकरणचाक्षुषत्वादेरिव चाक्षुषत्वाद्यव्यापक-तत्समानाधिकरणस्य उपेक्षात्वस्यापि जातित्वं स्यात् इत्यप्रयोजकत्वशङ्काग्रास इत्युच्यते, तदा यज्जात्यव्यापकत्वे सति यज्जातिव्यभिचारि यत्तत्र तज्जातिसमानाधिकरणजातिरिति सामान्यतो व्याप्त्या उपेक्षात्वे चाक्षुषत्वादिसमानाधिकरणजातित्वाभावः साध्यः, चाक्षुषत्वादिव्यापकज्ञानत्वादौ ज्ञानत्वादिव्याप्यचाक्षुषत्वादौ व्यभिचारवारणाय दलद्वयम्। वस्तुतस्तु स्वाव्यापकस्वव्यभिचारिजातित्वव्यापकविरोधप्रतियोगि (१) यद्यत् स्वं तत्तद्भेदकूटं हेतूकृत्य उपेक्षात्वादौ जातिसङ्कीर्णधर्मे जातित्वाभावः साधनीयः,

---

(१) स्वाव्यापक-स्वव्यभिचारित्वमात्रव्यापकत्वनिवेशे चाक्षुषत्वादौ व्यभिचारः स्वसमानाधिकरणोपेक्षात्वादेः स्वाव्यापक-स्वव्यभिचारितया चाक्षुषत्वादेः स्वानन्तर्भावात् अतो जातित्वेति। तादृशजातित्वसामानाधिकरण्योक्तौ स्वाव्यापक-स्वव्यभिचारिघटत्वादिजातेः स्वविरोधितया उपेक्षात्वादेः तादृशजातित्वसमानाधिकरणविरोधप्रतियोगितया स्वान्तर्भावात् स्वरूपासिद्धिः स्यादतो व्यापकतानिवेशः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपेक्षात्वाद्यव्यापकतद्व्यभिचारिचाक्षुषत्वादिजातौ तद्विरोधासत्त्वेन उपेक्षात्वादेर्निरुक्तस्वान्तर्भावात् तत्र च तादृशभेदकूटस्य उभयसिद्धत्वात्। न च सत्ताव्यभिचारिजातेरप्रसिद्ध्या नेदृशं स्वं सत्तेति तत्र व्यभिचार इति वाच्यम्। अपरजातित्वाभावस्यैव साध्यत्वोपगमात्, तत्र साध्यसत्त्वेन व्यभिचारानवकाशात्। यत्र च तुल्ययुक्त्या आपादितजात्यन्तरेण सङ्करस्य जातित्वबाधकता यथा प्राचां भूतत्व-मूर्त्तत्वयोः परस्परसङ्करेण जातित्वखण्डनं, तत्र जातिसङ्करहेतोरसिद्धत्वेऽपि (१) व्याप्य-व्यापकभावानापन्नसमानाधिकरणद्वयवृत्तित्वेन स्वाश्रयैकधर्म्मव्यापकापरवृत्तियत्तद्भिन्नत्वे सति स्वाश्रयैकधर्म्मवदवृत्तिवृत्तियत्तदन्यानेकवृत्तित्वेन वा(२) तदुभयत्वे जातित्वाभावसामानधिकरण्यं साधनीयं, विनिगमकविरहेणोभयोर्जातित्वाभावपर्य्यवसानमिति कृतमतिविस्तरेण। ननु चाक्षुषत्वादिव्याप्यमुपेक्षात्वं नानैव स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकमुपगन्तव्यं, भेदकूटस्य कारणतावच्छेदकत्वे बाधकाभावात्। तथाच न जातिसङ्कर इत्याशङ्क्य बाधकान्तरमाह, 'आंशि-

---

(१) भूतत्वादेः स्वाव्यापक-स्वव्यभिचारिजातित्व-व्यापकविरोधप्रतियोगितया स्वान्तर्भावादिति भावः।

(२) समानाधिकरणजातिद्वयोभयत्वे व्यभिचारवारणाय व्याप्येत्यादि, विरुद्धजातिद्वयोभयत्वे व्यभिचारवारणाय समानाधिकरणेत्यादि, व्याप्य-व्यापकभावस्याननुगमात् हेत्वन्तरानुसरणं समानाधिकरणजातिद्वयोभयत्वे व्यभिचारवारणाय प्रथमसत्यन्तं विरुद्धजातिद्वयोभयत्वे व्यभिचारवारणाय द्वितीयसत्यन्तं उपेक्षात्वचाक्षुषत्वोभयत्वे जातित्वाभावसामानाधिकरण्यसाधने उपेक्षात्वस्य जातित्वाभावपर्य्यवसानं चाक्षुषत्वे जातित्वस्य उभयवादिसिद्धत्वादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कत्वेति, यत्र समूहालम्बनस्य ज्ञानस्य एकविषयस्मारकत्वं अपरविषयास्मारकत्वञ्च तत्र उपेक्षात्वजात्यनभ्युपगमे सकलविषयस्मारकत्वं उपगमे च सकलविषयास्मारकत्वं स्यात् इति यद्विषयास्मारकत्वं तस्य तद्विषयावच्छेदेन उपेक्षात्वं स्वीकरणीयं, अन्यविषयांशे च तदभाव इति तद्विषयकस्मृतौ च तद्विषयावच्छिन्नमुपेक्षान्यत्वं प्रयोजकं वाच्यमित्यव्याप्यवृत्तित्वादुपेक्षात्वं न जातिरित्यर्थः । न चांशिकोपेक्षयामपि न विषयान्तरावच्छेदेन उपेक्षात्वाभावः स्वीक्रियते किन्तु तद्विषयकत्वस्य उपेक्षात्वानवच्छेदकत्वमात्रम्(१), प्रतियोग्यनवच्छेदकस्य तस्य तदभावावच्छेदकत्वानियमात्, तथा नियमे दण्डादेर्द्रव्यत्वादिना घटादिजनकत्वाभावप्रसङ्गादिति नोपेक्षात्वस्याव्याप्यवृत्तित्वं स्वाभावसामानाधिकरण्यादिति वाच्यम् । जातावभावसामानाधिकरण्यवत् किञ्चिदवच्छिन्नवृत्तिकताया अपि सिद्धान्तविरुद्धत्वात् । यद्यपि उपेक्षात्वस्य स्मृत्यजनकत्वादिरूपोपाधित्वमते न स्वाभावसामानाधिकरण्यमवच्छिन्नवृत्तिकत्वं वेति नायमुभयसिद्धो हेतुः (२) । तथापि तन्मतसिद्धहेतुनैव तं प्रति जातित्वाभावः साध्यते अतएवोपगमादित्युक्तम् । वस्तुतस्तु प्रमेयत्वादिनांशिकत्व-जातित्वोभयाभावः साधनीयः उपेक्षान्यत्वेन स्मृतिहेतुतावादिना च तस्य आंशिकत्वोप-

---

(१) तथाच उपेक्षात्वानवच्छेदकतद्विषयकत्वं तद्विषयकस्मृतिजनकतावच्छेदकमिति भावः ।

(२) आंशिकत्वोपगमादित्यस्य नोभयसिद्धहेतुत्वमिति भावः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गमाज्जातित्वाभावमादाय पर्य्यवसानमित्यांशिकत्वोपगमाच्चेत्यनेन दर्शितम् ।

चिन्तामणिदीधितिः ।

नापि प्रवृत्तिनिवृत्त्यजनकत्वमजिज्ञासितविषयत्वं वा, तादृशादपि स्मृत्युत्पादात् । नापि संस्काराजनकत्वं, तज्जनकतावच्छेदकरूपान्तरापरिचयात् अन्योन्याश्रयप्रसङ्गात् संस्कारानुत्पत्त्यैवास्मरणसम्भवे स्मृतिजनकतायां तदप्रवेशाच्च । नाप्यनुभवत्वेन तथात्वं, संस्कारस्य फलनाश्यतया सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसङ्गात् समानाकारस्यैव फलस्य नाशकत्वात्, समूहालम्बनादितो नैकैकगोचरक्रमिकस्मरणानुपपत्तिः, जायते च पुनः पुनः स्मरणाद्दृढतरः संस्कारः ।

गादाधरी विवृतिः ।

ननु मा भूदुपेक्षात्वं जातिस्तद्गोचरप्रयत्नाप्रयोजकत्वरूप उपाधिरेव तद्विषये उपेक्षात्वं हानोपादानभिन्नज्ञाने (१) उपेक्षात्वव्यवहारात् तदवच्छिन्नान्यत्वमेव तद्विषयकस्मृतिप्रयोजकं वाच्यं, अतएव ज्ञानस्य किञ्चिद्विषयस्मारकत्वं किञ्चिद्विषयास्मारकत्वञ्च उपपद्यते निरुक्तोपेक्षात्वस्य विषयभेदनियन्त्रितत्वात् । अथवा

(१) हीयतेऽनेनेति व्युत्पत्त्या हानपदेन निवृत्तिप्रयोजकं ज्ञानं उपादीयतेऽनेनेति व्युत्पत्त्या उपादानपदेन प्रवृत्तिप्रयोजकं ज्ञानं प्रतीयते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वसमानाधिकरणतद्विषयकजिज्ञासानुत्तरत्वं (१) तदित्याशङ्कां निराकरोति, 'नापीति, 'प्रवृत्ति-निवृत्त्यजनकत्वमिति, स्मृति-प्रयोजकभेदप्रतियोगितावच्छेदकमित्यर्थकमुपेक्षात्वमित्यनुषज्यते, तस्योपेक्षापदप्रवृत्तिनिमित्तमित्यर्थकत्वे न तदनुसङ्गसम्भवः प्रवृत्ति-निवृत्त्यजनकत्वादेरुपेक्षापदप्रवृत्तिनिमित्तत्वे तादृशज्ञानस्य स्मृत्युत्पादकतायाम् अबाधकत्वेनाग्रिमहेत्वसङ्गतेः। किन्तु स्मृति-प्रयोजकभेदप्रतियोगितावच्छेदकमिति पूरणीयम्। ननूपेक्षा-ज्ञानात् संस्कारानुत्पादेन तद्विषयकसंस्काराजनकत्वरूपोपेक्षात्वाव-च्छिन्नभेदस्तत्संस्कारजनकत्वपर्य्यवसितः तत्स्मृतिजनकतावच्छेदको वाच्य इत्याशङ्कां निरस्यति, 'नापीति, 'तज्जनकतावच्छेदकेति, संस्कारं प्रति उपेक्षासाधारणरूपेण निश्चयत्वमात्रेण हेतुत्वे उपेक्षायाः संस्काराजनकत्वं दुर्घटम् इति संस्काराजनकत्वस्य तदैवोपेक्षात्वरूपता सम्भवति यद्युपेक्षाव्यावृत्तरूपेण संस्कारजन-कता स्यात्तादृशञ्च रूपमुपेक्षान्यनिश्चयत्वादन्यत् दुर्व्वचम् अतः संस्कारं प्रत्यपि उपेक्षान्यत्वेन हेतुता वाच्या तादृशोपेक्षात्वस्य संस्काराजनकत्वरूपत्वे आत्माश्रयः (२)। स्मृत्यजनकत्वरूपत्वे च संस्कारं प्रति स्मृतिजनकत्वेन स्मृतिं प्रति च संस्कारजनकत्वेन

---

(१) अनादौ संसारेऽवश्यमेव तत्पूर्व्वं कस्यचित् तद्विषयकजिज्ञासोदयात् तद्विषयकजिज्ञासानुत्तरत्वं अप्रसिद्धमतः स्वसमानाधिकरणेति।

(२) संस्काराजनकत्वावच्छिन्नान्यत्वस्य संस्कारजनकत्वपर्य्यवसितस्य संस्कार-जनकतावच्छेदकत्वे अवच्छेद्यज्ञानं प्रति अवच्छेदकज्ञानस्य हेतुतया स्वज्ञानापेक्ष-ज्ञानत्वरूपात्माश्रयप्रसङ्गादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतुतेत्यन्योन्याश्रयः (१) इति नैतद्युक्तमित्यर्थः। ननु संस्कार-जनकतावच्छेदकस्य उपेक्षासाधारण्येऽपि उपेक्षाव्यक्तीनां तत्तद्व्यक्तित्वेन संस्कारप्रतिबन्धकत्वोपगात् तासां संस्कारानुपधायकत्वनिर्व्वाहः। आंशिकोपेक्षाव्यक्तीनां तत्तद्विषकसंस्कारत्वमेव प्रतिबध्यतावच्छेदकमिति तासामप्यन्यविषयकसंस्कारोपधायकतया अन्यविषयस्मारकतोपपत्तिरित्यत आह, 'संस्कारेति।

यत्तु ननु तत्तद्व्यक्तित्वेनैवोपेक्षाव्यक्तीनां भेदाः संस्कार-जनकतावच्छेदकाः। न चैवं भेदसहस्रस्य विशेष्य-विशेषणभावे विनिगमनाविरहः, एकैकभेदं पृथक्पृथक्निवेश्य एकैककारणताभ्युपगमात् एकोपेक्षाज्ञानव्यक्तिदशायाम् अन्योपेक्षाव्यक्तिभिन्न-ज्ञानसत्त्वेऽपि तदुपेक्षाव्यक्तिभिन्नज्ञानरूपकारणविरहेण संस्कारानुत्पादसम्भवात्। न चोपेक्षाद्वयसत्त्वे सकलकारणसत्त्वात् संस्कारापत्तिः, तद्वारणाय तादृशव्यक्तिद्वयभेदस्य एकत्र निवेश्यत्वात् तयोर्भेदयोर्व्विशेष्य-विशेषणभावे विनिगमनाविरहात् कारणताद्वय-मिष्टमेव, उपेक्षाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतामतेऽपि तत्कालीनसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबन्धकतया गौरवात्, एवञ्च संस्कारानुपधायत्वरूपोपेक्षात्वावच्छिन्नभेदस्य स्मृतिजनकतावच्छेदकत्वे नान्योन्याश्रय इत्यत आह, 'संस्कारेतीत्य-वतारणम्। तदसत्, तत्तदुपेक्षान्यत्वेन कारणतामतेऽपि तेन रूपेण

(१) स्मृतिजनकत्वावच्छिन्नसंस्कारजनकता संस्कारजनकत्वावच्छिन्नस्मृतिजनकतेति अतः स्वज्ञानापेक्षज्ञानापेक्षज्ञानकत्वरूपान्योन्याश्रयप्रसङ्ग इति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानस्य संस्कारहेतुता तत्तदुपेक्षाकालीनसंयोगादिवक्त्रेर्वा तत्प्रतिबन्धकता कल्प्यते इत्यनुयोगस्याशक्यसमाधानत्वात्।

'संस्कारानुत्पत्त्यैव' इत्यस्य उपेक्षाज्ञानादित्यादिः, संस्काराजनकत्वस्य तदैवोपेक्षात्वरूपतासम्भवो यद्युपेक्षाधीः संस्कारं न जनयेत्, तथा सति संस्काररूपव्यापारविरहेणैव उपेक्षाया अस्मारकत्वसम्भवे उपेक्षात्वस्य संस्काराजनकत्वरूपस्य सुनिर्व्वचत्वेऽपि तदवच्छिन्नान्यत्वस्य निष्प्रयोजनकतया स्मृतिजनकतावच्छेदकगर्भेऽनिवेशादित्यर्थः, तथाच विशिष्टस्मरणातिव्याप्तिर्दुर्व्वारैवेति भावः। न च तद्विषयकस्मृतौ तद्विषयकसंस्काररूपव्यापारेण यथा तद्विषयकज्ञानत्वावच्छिन्नस्य नान्यथासिद्धिः तथा उपेक्षान्यत्वसहिततद्रूपावच्छिन्नस्यापीति (१) तेन रूपेण स्मृतिहेतुता दुर्व्वारेति वाच्यम्। संस्कारासिद्धौ संस्काराजनकत्वरूपोपेक्षात्वावच्छिन्नभेदघटितधर्म्मपुरस्कारेण कारणताकल्पनासम्भवात् तादृश(२)धर्म्मावच्छिन्नकारणतायाः संस्काररूपव्यापारसिद्धौ अनुपजीव्यतया तद्रूपावच्छिन्नस्यान्यथासिद्धावुपजीव्यविरोधरूपबाधकानवकाशात्।

यत्तु ननूपेक्षात्वस्यानुगतस्य निर्व्वचनासम्भवेऽपि उपेक्षाज्ञानात् स्मरणानुत्पत्त्या तत्तदुपेक्षाव्यक्तिभिन्नत्वेनैवागत्या स्मृतिहेतुत्वमुपेयं तथाच न विशिष्टस्मृतावतिव्याप्तिरित्यत आह, 'संस्कारानुत्पत्त्यैवेति, इत्यवतार्य्य उपेक्षाज्ञानात् संस्कारो नोपगम्यते गौरवात् तन्नि-

---

(१) तद्विषयकज्ञानत्वावच्छिन्नस्यापीत्यर्थः।

(२) उपेक्षान्यज्ञानत्वरूपेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्व्वाहाय च संस्कारजनकतायाम् उपेक्षाभेदनिवेशस्यावश्यकत्वे स्मृतिजनकतायां न तन्निवेशः संस्काराभावेनैव उपेक्षितास्मरणोपपत्तेः। न च फल-व्यापारौ प्रति करणस्य एकरूपेण हेतुतेति नियमपरित्यागे निश्चयत्वमपि संस्कारजनकतायामेव निवेश्यतां तथाच कथमतिव्याप्तिरिति वाच्यम्। संस्कारजनकतायां निश्चयत्वनिवेशे उपेक्षान्यत्वेन सह विशेष्य-विशेषणभावे विनिगमनाविरहात् स्मृतिजनकतायामेव निश्चयत्वनिवेशौचित्यात् संशयादिधर्म्मिगोचरसंस्कारस्यावश्यकतया निश्चयत्वेन विशिष्टसंस्काराहेतुत्वे संशयजन्यसंस्कारे विशिष्टविषयकत्वमात्रकल्पनम् उपेक्षान्यत्वेन तदहेतुत्वे(१) विशिष्टविषयकसंस्काररूपधर्म्मिकल्पनमिति न विनिगमनाविरहेण वैपरीत्यप्रसक्तिः (२)। वस्तुत उपेक्षाज्ञानानां संस्कारप्रतिबन्धकत्वमेवोपेयते तथाच फल-व्यापारौ प्रति करणस्य एकरूपेण हेतुत्वनियमात् उभयत्रैव निश्चयत्वप्रवेशः। एतेनांशिकोपेक्षाज्ञानादन्यविषयकसंस्कारस्य प्रामाणिकतया तद्भेदाः स्मृतिजनकतायामेव निवेश्यन्ते न तु संस्कारजनकतायां तथा सति सर्व्वांशे उपेक्षाभेदैः सह विशेष्य-विशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यप्रसङ्गादिति निश्चयत्वं संस्कारजनकतायामेव निवेश्यं, स्मृतिजनकतायां तन्निवेशेऽपि आंशिकोपेक्षाभेदैः सह

(१) संस्काराहेतुत्वे च उपेक्षाज्ञानाद्विशिष्टविषयकसंस्काररूपधर्म्मिकल्पनमिति गौरवात् न विनिगमनाविरहावकाश इति भावः।

(२) स्मृतिजनकत्वं उपेक्षान्यत्वेन संस्कारहेतुत्वं निश्चयत्वेनेति वैपरीत्यप्रसक्तिरित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशेष्य-विशेषणभावे विनिगमनाविरहतादवस्थ्यादित्यपास्तम्। तथाच स्मरणातिव्याप्तिः सुदृढ़ैवेति व्याख्यानं, तदसत्, व्यापारासिद्धिदशायां कल्पनीयस्य तत्तदुपेक्षान्यत्वेन स्मृतिहेतुत्वस्य उत्तरकालकल्प्यव्यापारविरहेण कार्य्यातिप्रसङ्गवारणसम्भवेऽपि निराकरणासम्भवात् उक्तशङ्कया 'संस्कारानुत्पत्त्यैव' इत्यादिफक्किकावतारणासङ्गतेः।

ननु तद्विषयकस्मृतौ तद्विषयकज्ञानत्वेन न हेतुता अपितु तद्विषयकानुभवत्वेनैव अनुभवत्वस्यापि जातित्वेन ज्ञानत्वापेक्षयाऽगौरवात् स्मृत्युत्तरमपि पूर्व्वानुभवादेव स्मरणोपपत्तेः स्मृतिः स्मृतिहेतुताया अप्रामाणिकत्वात् तथाच न ज्ञानत्वघटितधर्म्मावच्छिन्नकारणताघटितानुमितिलक्षणस्य विशिष्टस्मृतावतिव्याप्तिः। न चानुभवत्वापेक्षया अगुरुणा ज्ञानत्वेनापि स्मृतिहेतुताया विनिगमनाविरहेण दुर्व्वारतया तादृक्कारणतामादायातिव्याप्तिर्दुर्व्वारैवेति वाच्यम्। अगुरुव्याप्यधर्म्मपुरस्कारेण कारणत्वसम्भवे व्यापकधर्म्मस्यान्यथासिद्धिनिरूपकत्वात् इत्याशङ्कां निरस्यति, 'नाप्यनुभवत्वेनेति, 'संस्कारस्य फलनाश्यतया' स्वजन्यस्मृतिनाश्यतया, प्रथमस्मरणेनैव पूर्व्वानुभवजन्यसंस्कारनाशे, 'सकृदनुभूतस्य' स्मरणोत्तरमननुभूतस्य विषयस्यानुभवरूपकरणव्यापारासत्त्वेन 'अस्मरणप्रसङ्गात्' स्मरणान्तरानुपपत्तेरित्यर्थः। स्वजन्यस्मरणस्य संस्कारनाशकत्वे स्मृतिसाधारणेन ज्ञानत्वेन स्मृतिहेतुत्वेऽपि घट-पटादिरूपनानाविषयावगाहिना अनुभवेन जनितस्य तावद्विषयकसंस्कारस्य घटाद्येकैकगोचरस्मरणेनापि विनाशात्तदुत्तरं पटादि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मरणानुपपत्तिः तद्विषयकसंस्काराभावात्। स्मृतिजन्यघटादि-गोचरसंस्कारस्य च भिन्नविषयकतया पटादिस्मारकत्वायोगादिति शङ्कां निरस्यति, 'समानेति, समानाकारस्य अन्यूनाकारस्य, अतः प्रत्येकगोचरनानासंस्कारजनितसमूहालनस्मरणे स्वजनकसकलसंस्कारनाशहेतुतानिर्व्वाहः। अथात्र नाशकता यदि स्वजन्यस्वान्यूनविषयकस्मृतित्वेन तदा स्वपदस्य तत्तत्संस्कारव्यक्तिपरताया आवश्यकत्वात् तत्तद्व्यक्तिभेदेन कारणताबाहुल्यं, तदुपगमे तत्तद्व्यक्तित्वेनैव नाशकताया युक्तत्वात् (१)। यदि च प्रतियोगितासम्बन्धेन संस्कारनाशं प्रति जनकत्वानतिरिक्तविषयकत्वोभयसम्बन्धेन स्मृतित्वेन हेतुता जनकत्वनिवेशात् स्वजन्यसंस्कारस्य स्मृत्या न विनाशः। जनकत्वस्थले तद्घटकं पूर्व्ववर्त्तित्वमेव वा निवेश्यं नियमानन्यथासिद्धत्वप्रवेशवैफल्यात्। न च व्यधिकरणस्मृतेरपि नाशकतापत्तिः, व्यधिकरणस्मृतिं प्रत्यपि संस्कारस्य स्वरूपयोग्यतया सामानाधिकरण्यनिवेशस्योभयमते (२) आवश्यकत्वात्। वस्तुतः सामानाधिकरण्यसहितमनतिरिक्तविषयकत्वमेव सम्बन्धः न तु जनकत्वस्य पूर्व्वकालीनत्वस्य वा निवेशः। ज्ञानादीनां क्षणिकतावारणाय प्रतियोगितासम्बन्धेन नाशं प्रति पूर्व्वत्वसम्बन्धेन नाशस्य सामान्यकारणताया आवश्यकत्वात् तत एव स्वजनकस्मरणेन

(१) तथाचानुभवत्वेन स्मृतिजनकत्वेऽपि न स्मरणोत्तरस्मरणानुपपत्तिः तस्य नाशकत्वानभ्युपगमादिति भावः।

(२) जनकत्वस्य सम्बन्धघटकत्वमते एतन्मते चेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्कारस्य स्वोत्पत्तिद्वितीयक्षणे नाशापत्त्यनवकाशात् तदानीञ्च स्मृतेर्विनाशेन ततस्तदुत्तरक्षणमपि (१) तन्नाशापत्त्यसम्भवात् । अनतिरिक्तविषयकत्वञ्च स्वावृत्तिविषयिताशून्यत्वं न तु स्वाविषयाविषयकत्वं, प्रमेयत्वादिना सकलप्रमेयविषयकस्मरणस्याविषयाप्रसिद्धेः संस्कारनाशकतानुपपत्तेः भावत्वादिना सकलभावादिविषयकस्मरणाद्घट इत्यादिज्ञानजन्यसंस्कारनाशापत्तेश्च इत्युच्यते, तदापि सम्बन्धमध्ये तत्तत्स्मरणव्यक्तिरूपस्वपदार्थमनन्तर्भाव्य अनतिरिक्तविषयकत्वस्यावृत्तिविषयिताद्यप्रसिद्ध्या दुर्व्वचत्वेन तत्तद्व्यक्तिविश्राम आवश्यकः । स्वनिष्ठभेदप्रतियोगितावच्छेदकविषयिताशून्यत्वरूपानतिरिक्तविषयकत्वेऽपि भेदे तत्तत्स्मृतिव्यक्तिनिष्ठत्वविशेषणमावश्यकम् अन्यथा अवच्छेदकत्वान्तस्य विषयितायामव्यावर्त्तकतापत्तेरिति चेत्, सत्यं, तत्प्रकारक-तद्विशेष्यकसंस्कारनाशं प्रति तत्प्रकारक-तद्विशेष्यकस्मृतित्वेन कारणता कार्य्यस्य सम्बन्धः प्रतियोगिता कारणस्य पूर्व्ववर्त्तित्वसहितं तदसहितं वा सामानाधिकरण्यं तत्तद्विषयकसंस्कारभेदोऽपि प्रतियोगिप्रत्यासन्नो हेतुरतो घटत्वप्रकारक-घटविशेष्यकसमूहालम्बनानात्मकस्मृत्या यथा समूहालम्बनानात्मकस्तत्प्रकारक-तद्विशेष्यकसंस्कारो नाश्यते तथा समूहालम्बनात्मकोपि तादृशसंस्कारो नाश्यताम्, अन्यविषयकस्मृतिविरहस्य तद्विषयकस्मृतिघटितसामग्रीविरहाप्रयोजकत्वादिति दूषणस्य नावकाशः । समूहालम्बनानात्मकतद्विषयकसंस्कारनाशप्रयोजकसामग्र्या अन्य-

(१) स्वोत्पत्तिद्वितीयक्षणोत्तरक्षणमपीत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयकसंस्कारभेदरूपकारणकूटघटितत्वात् समूहालम्बनसंस्कार-नाशकसामग्र्याश्च अन्यविषयकस्मृतिघटितत्वात्, समूहालम्बन-संस्कारे च तादृश्याः कस्या अपि सामग्र्या उक्तस्थलेऽसत्त्वात्। न चैवमपि गोत्वाभाववान् गोत्वाभाव इत्यादिज्ञानजन्यसंस्कारस्य गोत्वाभाव इत्याकारकस्मरणाद्विनाशापत्तिः, तादृशसंस्कारे तादृश-स्मृतिसहकारिणां यावत्तदविषयविषयकसंस्कारभेदानां सत्त्वात् तद्विषयकगोत्वादिविषयकसंस्कारभेदस्य च तदसहकारित्वात्, गोत्वाभावादिनिष्ठतत्सम्बन्धस्यापि तत्स्वरूपतया (१) तादृशस्मृति-नाश्यसंस्कारविषयत्वेन (२) तद्विषयकसंस्कारभेदस्यापि तादृश-सहकारित्वासम्भवादिति (३) वाच्यम्। तत्तत्प्रकारकान्यसंस्कार-नाशे तत्तत्प्रकारकसंस्कारभेदत्वेन हेतुताया उपगम्यतया गोत्वा-भाव इत्यादिस्मृतिनाश्यसंस्कारसाधारणस्य गोत्वाभावादिप्रकारक-संस्कारभेदस्य तादृशस्मृतिसहकारितया (४) गोत्वाभाववान् गोत्वा-भाव इत्यादिधीजन्यसंस्कारे तादृशभेदासत्त्वेन उक्तापत्त्यसम्भवात्, द्रव्यत्वादिना घट-पटादिविशेष्यकसंस्कारस्य तेन रूपेण घटादि-मात्रविशेष्यकस्मृतितो विनाशवारणाय तत्तदविशेष्यकसंस्कारनाशे तत्तद्विशेष्यकसंस्कारभेदस्य हेतुत्वमपि वाच्यम् एवं समानप्रकारक-समानविशेष्यकनानासम्बन्धावगाहिसंस्कारस्य एकमात्रसंसर्गक-

---

(१) गोत्वाभावस्वरूपतयेत्यर्थः।

(२) गोत्वप्रकारक-गोत्वाभावविशेष्यकसंस्कारविषयत्वेन।

(३) तस्य सहकारित्वे तादृशभेदघटितसामग्र्यास्तादृशसंस्कारेऽभावात् तस्य तादृशस्मरणनाश्यत्वानुपपत्तेरिति भावः।

(४) गोत्वाभाव इति स्मृतिसहकारितयेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मृतितो विनाशवारणाय तत्तद्संसर्गकसंस्कारनाशे तत्तत्संसर्गक-संस्कारभेदस्यापि हेतुता बोध्या। वस्तुतस्तादृशधर्म्मिविशेष्यतानिरूपिततत्संसर्गावच्छिन्न-तादृशधर्म्मप्रकारताकान्यसंस्कारनाशे तथाविधतादृशधर्म्मप्रकारताकसंस्कारभेदो हेतुरित्येवोपगन्तव्यं अन्यथा द्रव्यत्व-पृथिवीत्वोभयरूपेण घटं पटञ्चावगाहमानस्य संस्कारस्य द्रव्यत्वमात्रेण च घटं पृथिवीत्वमात्रेण च पटमवगाहमानात् स्मरणाद्विनाशापत्तेः तत्र द्रव्यत्वमात्रेण घटं पृथिवीत्वमात्रेण पटमवगाहमानस्य संस्कारस्य यादृशसामग्रीतो नाशस्तादृशसामग्र्यास्तत्राक्षतत्वात् तादृशसंस्कारस्यापि (१) द्रव्यत्व-पृथिवीत्वोभयप्रकारकतया घट-पटोभयविशेष्यकतया च तन्नाशकसामग्र्यां तत्तत्प्रकारकभेद-तत्तद्विशेष्यकसंस्कारभेदाप्रवेशात् तन्नाशकसामग्रीघटकद्रव्यत्व-पृथिवीत्वेतरधर्म्मप्रकारकसंस्कारभेद-घट-पटभिन्नविशेष्यकभेदानाञ्चोक्तसमूहालम्बनसंस्कारेऽपि सत्त्वात्। संस्कारनाशं प्रति तादात्म्यसम्बन्धेन संस्कारत्वेनाप्येकहेतुता कल्पनीया अतः संस्कारनाशप्रयोजकसामग्र्या नादृष्टादिसाधारण्यम् (२)।

केचित्तु समूहालम्बनजन्यघट-पटादिसंस्कारा भिन्नभिन्ना एव संस्कारयौगपद्ये क्षतिविरहात् तथाच स्ववृत्तिविषयतावत्त्वस्यापि स्मृतिनिष्ठनाशकतावच्छेदकप्रत्यासत्तिघटकत्वोपगमात् घटादिस्मृत्या पटादिसंस्कारस्य न विनाशनं तस्य तत्स्मृतिवृत्तिघटादि-

(१) द्रव्यत्वमात्रेण घटं पृथिवीत्वमात्रेण पटमवगाहमानस्य संस्कारस्येत्यर्थः।

(२) अन्यथा तादृशतादृशसंस्कारभेद-तत्तत्प्रकारक-तत्तद्विशेष्यकस्मृत्यादिघटितसामग्र्याः कारणताघटकसम्बन्धेनादृष्टेऽपि सत्त्वात् अदृष्टसाधारण्यं स्यादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयावत्त्वाभावादित्युत्तरकालं पटादिस्मरणनिर्व्वाहः। एवं घटवद्भूतलमित्यादिविशिष्टज्ञानाद्घट इत्यादिस्मृतिनिष्ठप्रत्येकपदार्थीयविषयताशून्या एव विशिष्टगोचरसंस्कारा उपगम्यन्ते ते च न तादृशस्मृतितो विनश्यन्ति तत्र तादृशस्मृतिनिष्ठविषयतावत्त्वविरहात् अत उत्तरकालं विशिष्टस्मृतिनिर्व्वाहः। घट इत्यादिस्मृतेरपि घटादिविषयकसंस्कारत्वावच्छिन्नविशिष्टसंस्कारफलतया तद्व्यावर्त्तनाय फलस्य समानाकारकताकथनसङ्गतिरित्याहुः।

स्मृतिवृत्तित्वाभावविशिष्टविषयताविरहः संस्कारप्रत्यासन्नस्तन्नाशकः एकैकगोचरस्मृतिदशायां संस्कारनिष्ठविषयान्तरविषयतायां स्मृतिवृत्तित्वाभावसत्त्वेन तया प्रतिबन्धान्न समूहालम्बनसंस्कारनाश इत्यपरे।

नन्वनुगतरूपेण स्मृतेः संस्कारनाशकत्वं निर्युक्तिकं भवतां चरमस्मृतिजन्यस्येव ममाप्यनुभवजन्यसंस्कारनाशस्यापि अननुगतेनापि कालादिना नाशसम्भवात्। न च यत्र यत्र विषये चरमस्मृतिव्यक्तय उपेक्षारूपास्तत्रानुभवजन्यसंस्कारस्यानुगतात् स्मरणरूपनाशकान्नाशोपगम एव युक्तस्तत्र चरमस्मृतिजन्यसंस्कारस्याप्रसिद्ध्या अननुगतकालादेर्नाशकताया अनावश्यकत्वादिति वाच्यम्। ज्ञानत्वेन स्मृति-संस्कारहेतुतामते चरमस्मृतिविशेषाणां संस्काराजनकत्वनिर्व्वाहाय तत्तद्व्यक्तित्वेन तासां संस्कारप्रतिबन्धकतायाः कल्पनीयतया अनुभवत्वेन स्मृति-संस्कारहेतुत्ववादिन उक्तस्थलेऽनुभवजन्यसंस्कारनाशेऽननुगतानां हेतुत्वोपगमेऽपि गौरवानवकाशात् चरमस्मृतिव्यक्तीनामपि तत्तद्व्यक्तित्वेन संस्कारनाशकतासम्भवात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्कारस्य फलनाश्यताप्रवादसङ्गतिः इत्यनुभवत्वेन स्मृतिरुसंस्कार-हेतुतायां नोक्तबाधकावकाश इत्यत आह, 'जायते चेति, अनुभव-जन्यसंस्कारापेक्षया स्मरणात् दृढ़ः तदुत्तरस्मरणादितश्च दृढ़तर-दृढ़तमाः संस्कारा जायन्ते इत्यवश्यमेव स्वीकार्य्यम्, दार्ढ्यञ्च उत्कर्षरूपो जातिप्रभेदो झटितिस्मृत्युत्पादप्रयोजकः। न च दैववशसम्पन्नझटित्युद्बोधकसमवधानादेव स्मृतिनियमोपपत्त्यौ न तत्प्रयोजकतया संस्कारगतजातिविशेषः सिद्ध्यतीति वाच्यम्। यादृशसम्बन्धिविशेषज्ञानसत्त्वे पुनः पुनः स्मरणोत्तरं नियमतः स्मृतिर्न त्वनुभवमात्रोत्तरं तादृशोद्बोधकघटितसामग्र्या अनुगमाय संस्कारगतजातिविशेषस्यावश्यकत्वात् झटिति स्मृतेर्दैवाधीनत्वमुप-गम्य संस्कारातिशयखण्डने शास्त्रादावभ्यासोऽपि नोपयुज्येतेति नानुभवत्वेन संस्कारहेतुतासम्भवः इत्याशयः। इदन्तु बोध्यं दृढ़-दृढ़तरादिसंस्कारं प्रति समानविषयकस्मृतित्व-तादृशस्मरणो-त्तरस्मरणत्वादिना न हेतुता पुनःपुनरनुभवादपि संस्कारदार्ढ्य-दर्शनात्। नापि समानविषयकज्ञानोत्तरज्ञानत्वादिना उपेक्षो-त्तरोत्पन्नोपेक्षातो दृढ़संस्कारानुदयात् रोगादिना ज्ञातार्थगोचर-संस्कारनाशोत्तरजातज्ञानात्तदनुदयाच्च। किन्तु समानविषयकसं-स्कारत्वेन दृढ़संस्कारं प्रति,दृढ़-दृढ़तरतादृशसंस्कारत्वेन च दृढ़तर-दृढ़तमसंस्कारं प्रति जनकता, अतएव भावनायाः पटुतरभावना-जनकत्वप्रवादः। भावनया भावनान्तरजनने च उत्तरोत्तरज्ञानं सहकारि तस्य च संस्कारत्वावच्छिन्नं प्रत्येव स्मृतिसाधारणज्ञानत्व-घटितधर्म्मपुरस्कारेणैव हेतुता। न चैवं स्वजन्यज्ञानसहकारेणैव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वजनकज्ञानसहकारिणापि संस्कारः पटुतरसंस्कारं जनयत्विति वाच्यम्। स्वजन्यसंस्कारानुपहितज्ञानत्वेनैव संस्कारहेतुत्वोपगमात् अन्यथा सर्व्वत्र विनश्यदवस्थज्ञानात् पटुतरसंस्कारान्तरस्य दुर्व्वारत्वात् अनन्ताप्रामाणिकसंस्कारकल्पनागौरवेण इष्टापत्तेरयोगादिति।

अनुमानदीधितिः।

परित्यज्य च निश्चिताव्यभिचारकं रूपं गृह्यमाणव्यभिचारकेण कारणत्वकल्पनानुदयात् इदमेव चान्यत्र सामान्यस्य च हेतुतावच्छेदकत्वे वीजम् अभिहितञ्च तात्पर्य्यटीकायां प्रथमसूत्रेऽवयवविवेचनप्रस्तावे मिश्रैः, स्मृतीनां स्वकार्य्यसंस्कारविरोधिनीनामसहभावादिति चेन्न, चरमज्ञानपदस्यानुभवपरत्वात्साक्षात्तज्जन्यत्वस्य वा विवक्षितत्वादित्यपि कश्चित्। किञ्च व्याप्यविशिष्यकात्पक्षविशिष्यकाच्च परामर्शादनुमितिदर्शनाच्च तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वं लक्षणघटकमपि तदेव।

गादाधरी विवृतिः।

ज्ञानत्वेन स्मृति-संस्कारहेतुत्वे युक्त्यन्तरमप्याह, 'परित्यज्य चेति, निश्चितः कार्य्यतावच्छेदकावच्छेदेनाव्यभिचारो यद्रूपावच्छिन्नस्य तन्निश्चिताव्यभिचारकं, गृह्यमाणः कार्य्ये संशयसाधारणज्ञान-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयीभूतो यद्रूपावच्छिन्नस्य व्यभिचारस्तद्गृह्यमाणव्यभिचारकं, तथाच ज्ञानत्वावच्छिन्नस्य स्मृति-संस्कारयोर्न व्यभिचारशङ्कापि स्मृतेः संस्कारादिजनकत्वस्य सन्दिग्धत्वात् अनुभवत्वावच्छिन्नस्य तत्र व्यभिचारः सन्दिग्ध इति न तेन रूपेण कारणताग्रहः सम्भवतीति भावः। यद्यपि व्यभिचारसंशयस्य ग्राह्यसंशयतया कल्पनात्मक-कारणताग्रहे न विरोधित्वसम्भवः ग्राह्यसंशयस्य परोक्षज्ञाना-विरोधितायाः सर्व्वसम्मतत्वात्, तथापि कारणतायां सामान्य-विशेषरूपावच्छिन्नत्वयोः संशये सामान्यरूपस्य नियतपूर्व्ववर्त्ति-तावच्छेदकत्वं क्लृप्तं विशेषरूपस्य तथात्वमसिद्धतया कल्प्यमिति तस्य कारणतावच्छेदकत्वे कल्पनागौरवमिति गौरवप्रतिसन्धानेन प्रतिबन्धात् विशेषरूपे अवच्छेदकत्वग्रहो न सम्भवतीति बोध्यम्। 'इदमेव' निश्चिताव्यभिचारकत्वमेव, 'अन्यत्र' प्रवृत्त्यादिकार्य्ये, 'सामान्यस्य' इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकनिश्चय-त्वाद्यपेक्षया अधिकसंग्राहकस्य तदुभयवैशिष्ट्यावगाहिनिश्चयत्वादेः, संस्कारस्य स्मृतिजन्यत्वं नापसिद्धान्त इत्याविष्कर्त्तुं तत्र टीकाकार-संवादमाह, 'अभिहितञ्चेति, 'प्रथमसूत्रे' प्रमाण प्रमेयेत्यादिसूत्रे, 'अवयवविवेचनप्रस्ताव इति, तत्र पूर्व्वपूर्व्ववर्णस्मृतिसहित उत्तर-वर्णानुभव एव पदप्रत्यक्षहेतुरस्तु इत्याक्षेपे, समाधानं 'स्वकार्य्येति, स्वं स्मृतिः, तत्कार्य्यो यः संस्कारः स एव स्वानन्तरोत्पन्नविशेष-गुणविधया विरोधी नाशको यासां तासामित्यर्थः। एतच्च तृतीय-क्षणानवस्थाननिर्व्वाहकं त्रिचतुरादिव्यक्तीनां एकक्षणानवस्थान-रूपासहभावप्रयोजकतया अभिहितम्। 'चरमज्ञानपदस्येति,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'अनुभवपरत्वात्' अनुभवत्वावच्छिन्नरूपविशेषार्थकत्वात्, तथाच ताद्दशनिश्चयत्वावच्छिन्नजन्यानुभवत्वं लक्षणं तस्य चानुभवत्व-शून्यायां स्मृतावतिव्याप्तिर्न शङ्कास्पदमपीति भावः। अन्यस्य समाधानान्तरमुपन्यस्यति, 'साक्षादिति, साक्षात्तज्जन्यत्वं तज्जन्या-जन्यत्वे तज्जन्यतावच्छेदकावच्छिन्नाजन्यत्वे वा सति तज्जन्यत्वं परा-मर्शजन्यतावच्छेदकविशिष्टगोचरसंस्कारत्वावच्छिन्नजन्यायां स्मृतौ नास्तीति भावः। अत्र गौरवमस्वरसवीजम्। विशिष्टवैशिष्ट्यबोध-हेतुतायां ज्ञानत्वनिवेशव्यवस्थापनायाः शक्यत्वे तत्रातिव्याप्तिर्यथा वारणीया विशिष्टस्मरणेऽपि तेनैव प्रकारेण तद्वारणं सम्भवतीति चरमज्ञानपस्यानुभवपरत्वमपि नावलम्बनीयमित्याशयवानाह, 'व्याप्येति, 'व्याप्यविशेष्यकात्' आधेयतासम्बन्धेन व्याप्यरूप-विशेष्ये पक्षप्रकारकात् पर्व्वते वह्निव्याप्य इत्याकारकात्, 'पक्ष-विशेष्यकात्' अधिकरणतासम्बन्धेन पक्षरूपविशेष्ये व्याप्यप्रकार-कात् वह्निव्याप्यवान् पर्व्वत इत्याकारकात्, 'परामर्शात्' 'अनु-मितिदर्शनात्' अविलक्षणायाः पर्व्वतो वह्निमानित्यनुमितेरनु-भवात्, 'तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन' उभयानुगमकेन व्याप्य-पक्षोभयनिरूपितवैशिष्ट्यविषयताशालिनिश्चयत्वेन, 'तत्र हेतुत्वं' अनुमितिं प्रति कारणत्वं, न तु विशिष्टवैशिष्ट्यबोध-विशिष्ट-स्मरणजनकतावच्छेदकेन व्याप्यप्रकारक-पक्षविशेष्यकनिश्चयत्वा-दिना, अन्यतरासंग्रहादित्यर्थः (१)। ननु वैशिष्ट्यमत्र व्याप्यता-

---

(१) वह्निव्याप्यः पर्व्वते इत्यादिज्ञानासंग्राहकत्वादित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छेदकसम्बन्धरूपं विवक्षणीयं अन्यथा अतिप्रसङ्गात् (१) एवञ्च (२) संयोगावच्छिन्नाधारतादिकमेव धूमादेर्व्याप्यताघटकं न त्वाधेयत्वम्, तत् कुत उक्तरूपेण पक्षप्रकारकस्य पर्व्वते धूम-इत्यादिज्ञानस्य संग्रहः संयोगावच्छिन्नाधेयत्वस्यैव संसर्गत्वात्। न च पर्व्वते धूम इत्यादावपि व्याप्यताघटकः संयोगादिरेव सम्बन्धो न त्वाधाराधेयभाव इति वाच्यम्। पर्व्वतादिप्रति-योगिकसंयोगादेर्धूमादिरूपविशेष्यानुयोगिकत्वविरहेण तादृश-प्रत्ययस्य भ्रमत्वापातात्। आधाराधेयभावानवगाहने सप्तम्युल्लेखा-नुपपत्तेश्च। न च संयोगाद्यवच्छिन्नाधेयत्वमेव तत्र सम्बन्धः तत्-संसर्गकत्वेऽपि तदन्तर्गतसंयोगादिसंसर्गकत्वमक्षतमिति वाच्यम्। विशिष्टसंसर्गकत्वेऽपि विशेषणीभूतसंयोगादेः संसर्गतावच्छेदकतया तद्विषयतायाः प्रकार-विशेष्योभयनिरूपितत्वाभावात् अन्यथा (३) संयोगाद्यवच्छिन्नाधेयतासम्बन्धेन व्याप्यप्रकारकात् व्याप्ये पर्व्वत-इतिज्ञानात् संयोगाद्यवच्छिन्नाधारतासम्बन्धेन पक्षप्रकारकात् पर्व्वतवान् धूम इत्यादिज्ञानाच्चानुमितिप्रसङ्गात्। एतेनाधारा-धेयत्वयोस्तुल्यवित्तिवेद्यतया संयोगाद्यच्छिन्नाधारत्वावगाहित्वेन तादृशाधेयत्वावगाहित्वेन वा व्याप्य-पक्षविशेष्यकपरामर्शयोरनुगम-इत्यपि निरस्तम्। व्याप्ये पर्व्वत इत्यादि धियो दुर्व्वारत्वात्।

(१) कालिकसम्बन्धेन व्याप्यवत्तापरामर्शात् अनुमित्यापत्तिरूपातिप्रसङ्गा-दित्यर्थः।

(२) तादृशसम्बन्धरूपवैशिष्ट्यस्य विवक्षणीयत्वे च।

(३) संसर्गविशेषणीभूतसंयोगादिविषयताया अपि प्रकार-विशेष्योभयनिरू-पितत्वस्वीकारे इत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याप्यनिरूपिताधारत्वावगाहित्वेन पक्षनिरूपिताधेयत्वावगाहित्वेन वा अनुगमस्यान्यनिरूपिताधारत्वादिसम्बन्धावगाहिभ्रमासंग्रहेणासम्भवात्। अथ पर्व्वते धूम इत्यादिसप्तम्युल्लेखिप्रतीतौ संयोगावच्छिन्नाधेयत्वमेव धूमे पर्व्वतस्य संसर्गतया भासतां सा च पर्व्वत-धूमयोः संयोगानवगाहितया अनुमितावहेतुरेव उक्तरूपेणानुगमस्तु संयोगसम्बन्धेनैव व्याप्यांशे यः पक्षप्रकारकः यश्च पक्षांशे व्याप्यप्रकारकस्तयोरेव परामर्शयोः स्वीकरणीयः प्रथमज्ञानस्य उक्तयुक्त्या भ्रमत्वेऽपि तस्यानुमितिहेतुतायास्तेनाप्रत्याख्येयत्वात् इति चेन्न, व्याप्यतावच्छेदकसंयोगेन व्याप्यस्य पक्षवत्तायाः तत्र साध्यासत्त्वेऽप्युपपद्यमानतया व्याप्यांशे तेन सम्बन्धेन तद्वत्ताज्ञानस्य तत्र पत्ते साध्यानुमितिहेतुताया अनुभवविरुद्धत्वात्, अन्यथा समवायादिना द्रवत्वादिव्याप्ये गुणादौ तेन सम्बन्धेन सत्तादिप्रकारकप्रमात्मकज्ञानात् सत्तादौ बाधानवतारदशायां द्रव्यत्वादिसिद्धिप्रसङ्गः (१)। अत्राहुः। आधारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यतामते पर्व्वते धूम इत्यत्राधारतानिरूपिताधेयता धूमवान् पर्व्वत इत्यत्र च आधेयतानिरूपिताधारता सम्बन्धः न तु तुल्यमुभयोः संसर्गतया भानं प्रत्येकमुभयोरुभयप्रकारतापत्तेः, एवञ्च उभयत्रैवाधारत्वविषयता पर्व्वतविषयतया आधेयत्वविषयता च धूमविषयतया निरूपिता, तथाच पक्षविषयतानिरूपिता या आधारत्वविशेषविषयता तन्निरूपितनिरूपितत्वविषयतानिरूपिताधेयत्वविषयता-

---

(१) अथेत्यादिः सिद्धिप्रसङ्ग इत्यन्तः पाठः कस्मिंश्चित् आदर्शपुस्तके नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निरूपितव्याप्यविषयताशालित्वेन द्वयोरनुगमः। व्याप्ये पर्व्वतः पर्व्वतवान् धूम इत्यत्र च पक्षविषयतानिरूपिताधेयत्वविषयता व्याप्यविषयता चाधारत्वविषयतानिरूपितेति वैपरीत्यान्नोक्तानुगमकरूपस्यैतत्साधारण्यमिति नातिप्रसङ्गः। न चाधारत्वाद्यवगाहित्वस्य कारणतावच्छेदकत्वे तदनवगाहिनो व्याप्यताघटकशुद्धसंयोगादिना पक्षे हेतुमत्ताज्ञानादनुमित्यनुदयप्रसङ्ग इति वाच्यम्। प्राचां मते आधाराधेयभावगर्भस्य हेतुसामानाधिकरण्यस्य व्याप्तिघटकतया हेतुनिरूपिताधारतावगाहिधिय एवानुमितिजनकत्वात्। यदि च संयोगादिरिव संसर्गतया व्याप्तिप्रविष्टहेतुसामानाधिकरण्यघटकोन त्वाधारत्वं तदा संयोगादेर्यत्र हेतुतावच्छेदकसम्बन्धता तत्र तेन सम्बन्धेन व्याप्यप्रकारकज्ञानमेवानुमितिजनकम् न तु संयोगाद्यवच्छिन्नाधेयतासम्बन्धेन पक्षप्रकारकं व्याप्यविशेष्यकज्ञानं, हेतु-पक्षयोः सम्बन्धविधया व्याप्यतावच्छेदकसम्बन्धानवगाहनात्, तस्याधिकविषयत्वेन गौरवस्य पक्षविशेष्यकपरामर्शहेतुतायां विनिगमकत्वाच्च, परन्तु यत्र तादात्म्यसम्बन्धेन हेतुता तत्रैव व्याप्य-पक्षविशेष्यकपरामर्शयोर्व्याप्य-पक्षोभयविषयतानिरूपिततादात्म्यसंसर्गताकज्ञानत्वेन हेतुता तत्र च न कश्चिदतिप्रसङ्गः, निष्कृष्टजातिघटितानुमितिलक्षणस्य आवश्यकत्वेन तादृशकारणताघटितलक्षणस्यैव सर्व्वसाधारण्यसम्भवात्। न च जातिघटितलक्षणे जातावनुभवत्वव्याप्यत्वस्यावश्यं निवेशनीयतया स्मृतौ समानाकारत्वेन कार्य्य-कारणभावव्यवस्थापनमग्रे विफलं तावतैव स्मृतावतिप्रसङ्गवारणसम्भवादिति वाच्यम्। कार्य्यता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समानाधिकरणानुभवत्वव्याप्यजातिघटितलक्षणापेक्षया लाघवेन कार्य्यतावच्छेदकजातिघटितलक्षणस्यादरणीयतया स्मृतौ व्याप्य-पक्षोभयविशेष्यकपरामर्शद्वयसाधारणरूपेण कारणत्वे तादृश-कारणताप्रतियोगिककार्य्यतावच्छेदकस्मृतित्वजातिमादाय स्मरणा-तिव्याप्तेः प्रसक्त्या तादृशलक्षणाभिप्रायेण अनुभवत्वव्याप्यजाति-घटितलक्षणेऽपि स्मृतावनुगतरूपेणाहेतुत्वे अनुभवत्वान्यानुभवान्या-समवेतत्वरूपानुभवत्वव्याप्यत्वमुपेक्ष्य लघोरनुभवनिष्ठभेदप्रतियोगि-तावच्छेदकत्वरूपस्य निवेशनं सम्भवतीत्यभिप्रायेण वा स्मृतौ विशेषरूपेण हेतुत्वव्यवस्थापनसङ्गतेः लक्षणेऽपि तादृश्येव कारणता विशिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणाय निवेश्येत्यवधेयम् । 'लक्षणघटकमपि तदेवेति, 'तदेव' उभयवैशिष्ट्यावगाहिनिश्चयत्व-रूपानुगतधर्म्मावच्छिन्नकारणत्वमेव प्रकृतलक्षणघटकमुपेयमित्यर्थः, अन्यरूपावच्छिन्नहेतुताघटितस्य लक्षणस्यालक्ष्य एव सत्त्वादिति भावः ।

अनुमानदीधितिः ।

एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभावात् अन्यथा नियमेन स्मृतेरुभयविशेष्यकत्वप्रसङ्गात् समान-प्रकारकत्वेनैव ज्ञान-स्मरणयोः कार्य्य-कारणभावाच्च तत्व विशिष्यैव कार्य्य-कारणभावः न तूक्तरूपेण गौरवा-न्मानाभावाच्च इत्यपि केचित् । एवञ्च विशिष्टवैशिष्ट्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधादौ क्वापि नातिप्रसङ्गशङ्कापि वह्न्याद्यनुमितौ वह्न्यादिव्यभिचारधीविरोधिधीविषयधर्म्मप्रकारकपक्ष-धर्म्मताज्ञानत्वेन हेतुतामते तु नितरां तथैव लक्षणे निवेशात्। अतएव व्याप्यवत्पक्षाद्यभावग्रहं प्रति व्याप्य-वत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः व्याप्त्यविषयक-त्वेन वा जन्यं ज्ञानं विशेषणीयम्। एतेन स्मृतिं प्रति संस्कारद्वारा अनुभवं प्रति च साक्षाद्विशेषणधियोर्हेतु-त्वस्य निर्व्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्येव वा तस्या हेतुत्वस्य नियमतः कृतिसाक्षात्कारपूर्व्वं विषयस्मृतेश्च कल्पनात् व्याप्यवत्पक्षवत्त्वादिज्ञानेऽति-व्याप्तिरित्यपि परास्तम् ।

गादाधरी विवृतिः ।

विशिष्टस्मृतिकारणता नोक्तानुगतरूपावच्छिन्ना अपि तु विशेषरूपावच्छिन्नेति न तत्रातिव्याप्तिरित्याह, 'एकतरेत्यादिना 'तत्र विशिष्यैव कार्य्य-कारणभावः' इत्यन्तेन, 'तत्र' स्मृतिस्थले, 'विशिष्यैव' व्याप्यप्रकारकपक्षविशेष्यकस्मृतित्व-तादृशनिश्चयत्वादि-रूपविशेषधर्म्मसुपादायैव, 'कार्य्य-कारणभावः,' कल्प्यत इति शेषः। तत्र हेतुमाह, 'समानप्रकारकत्वेनैव ज्ञान-स्मरणयोः कार्य्य-कारणभावाच्चेति, तृतीयाया वैशिष्ट्यार्थकत्वात् 'समानप्रकारक-त्वेनेत्यस्य समानप्रकारकयोरित्यर्थः। तथाचासमानप्रकारकज्ञानस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मरणाहेतुत्वादित्यवधारणार्थः। एतावतानुगतरूपस्य कारणतातिरिक्तवृत्तित्वलाभः। असमानप्रकारकज्ञानस्य स्मृत्यकारणत्वे तस्य फलानुत्पादकत्वं हेतुमाह, 'एकतरेति व्याप्यादिमात्रविशेष्यकज्ञानात् पक्षादिविशेष्यकस्मरणानुत्पत्तेरित्यर्थः, एतदेव द्रढ़यति, 'अन्यथेति एकतरविशेष्यकज्ञानादपि अन्यतरविशेष्यकस्मृत्युत्पादोपगमे, व्याप्यादिविशेष्यकस्मृतीनां पक्षादिविशेष्यकत्वनियमापत्तेरित्यर्थः।

केचित्तु 'नियमेनेत्यत्र अकारप्रश्लेषः, तथाच 'अनियमेन' नियामकाभावेन, 'स्मृतेः' स्मृतिमात्रस्य, 'उभयविशेष्यकत्वप्रसङ्गादिति व्याचक्षते।

'विशिष्टवैशिष्ट्यबोधादाविति विशेषणतावच्छेदकप्रकारकविशेषणविशेष्यकनिश्चयत्वावच्छिन्नजन्यव्याप्यविशिष्टपक्षवैशिष्ट्यबोधादावित्यर्थः, 'आदिना, विशिष्टस्मृतिपरिग्रहः। व्यतिरेकिणि व्यतिरेकव्याप्तेरेव गमकतापक्षे अन्वय-व्यतिरेकव्याप्तिप्रकारतयोर्व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वेनानुगमय्य कारणतावच्छेदकत्वमते तादृशकारणताया एव लक्षणे निवेशात् एकविधव्याप्त्यवगाहिज्ञानादन्यविधव्याप्तिविषयक-विशिष्टवैशिष्ट्यबोधाद्यनुदयात् तज्जनकतावच्छेदकगर्भे विशिष्यैव तत्तद्व्याप्तिविषयतानिवेशेन एकरूपेणानुमिति-विशिष्टवैशिष्ट्यबोधादिहेतुताविरहात्तत्र नातिव्याप्तिप्रसक्तिरित्याह, 'वह्न्याद्यनुमितावित्यादिना, विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयहेतुतानभ्युपगन्तृमिश्रमते व्याप्यविशिष्टपक्षवैशिष्ट्यावगाहिप्रत्यक्षसामान्येऽति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याप्तिविरहेऽपि अभावबुद्धौ प्रतियोगितावच्छेदकप्रकारकप्रतियोगिविशेष्यकनिश्चयत्वेन हेतुता मिश्रेणावश्यं स्वीकरणीयेति वह्निव्याप्यवान् पक्षो नास्तीत्यभावग्रहे तन्मतेऽप्यतिव्याप्तिरस्तीति दर्शितरीत्यैव सा वारणीया इत्याह, 'अतएवेति, 'अतएव' उक्तानुगतरूपावच्छिन्नकारणताया लक्षणे प्रवेशादेव, 'व्याप्यवत्पक्षाद्यभावग्रहं प्रतीति पक्षतावच्छेदकावच्छिन्नविशेषणतया व्याप्तिविशिष्टावच्छिन्ना या प्रतियोगिता तन्निरूपितानुयोगिताप्रकारकाभावलौकिकप्रत्यक्षं प्रतीत्यर्थः, 'व्याप्यवत्पक्षादिज्ञानत्वेन' व्याप्तिविशिष्टप्रकारकपक्षतावच्छेदकावच्छिन्नविशेष्यकनिश्चयत्वेनेत्यर्थः । दण्डो रक्तो नास्तीत्यभावग्रहस्य दण्डो रक्तो न वेति संशयादनुत्पत्तेरानुभविकतया विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकधीहेतुतावादिनां तद्विशेषहेतुतायामिव मिश्रमते सधर्म्मितावच्छेदककप्रतियोगितावच्छेदकप्रकारकज्ञानहेतुतायां निश्चयत्वनिवेशस्यावश्यकत्वादिति भावः। 'न क्षतिः' नातिव्याप्तिः, व्याप्यपक्षविशेष्यकयोरन्वय-व्यतिरेकव्याप्तिप्रकारकयोः परामर्शयोरनुगमकरूपस्याभावप्रत्यक्षजनकतानवच्छेदकत्वादिति भावः । यदि चानुमिति-परामर्शयोः समानविशेष्यकत्वानुभवानुरोधात् विनिगमकान्तराद्वा (१) पक्षविशेष्यक एव परामर्शोऽनुमितिहेतुरुपेयते व्यतिरेकिणि च व्यतिरेकसहचारेण अन्वयव्याप्तिरेव गृह्यते इति मतं, व्यतिरेकव्याप्तेरनुमितिप्रयोजकत्वेऽपि मणि-

(१) व्याधेयत्वीयसांसर्गिकविषयतायाः कारणतावच्छेदककोटिनिवेशे गौरवं विनिगमकम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मन्त्रादिन्यायेन विरोधितया अप्रामाणिकतया अनुगमासम्भवेन पृथक् पृथगेव व्याप्तिज्ञानयोरनुमितिहेतुता व्यतिरेकग्रन्थे दर्शनीयरीत्या च(१) व्यभिचारवारणं, तदा नोक्तरीतिद्वयेन विशिष्ट-वैशिष्ट्यबोधाद्यतिव्याप्तिवारणसम्भवः, न वा पूर्व्वोक्तरीत्या (२) अनुद्बुद्धसंस्कारात् विशिष्टवैशिष्ट्यबोधवारणाय तद्धेतुतायां ज्ञानत्व-प्रवेशस्यावश्यकत्वादित्यालोच्य तदतिव्याप्तिवारणाय विशेषणान्तरं प्रवेशयति, 'व्याप्यविषयकत्वेन वेति, लिङ्गोपधानस्य मणिकृता अनभ्युपगमात् तन्मतेऽसम्भवेपि न क्षतिः। उक्तविशिष्टवैशिष्ट्यबोध-विशिष्टस्मरणादेर्व्याप्तिविषयकत्वनियमान्नातिव्याप्तिरिति भावः। ननु अनुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिवारणाय उद्बो-धकाभावविशिष्टसंस्काराद्यन्यत्वमेव विशेषणतावच्छेदकप्रकारक-हेतुतायां निवेश्यं न तु ज्ञानत्वं पूर्व्वोपदर्शितव्यभिचारस्य दुर्व्वार-त्वात् (३) अनन्यगतिकतया जनकतावच्छेदकगौरवस्यादोषत्वात् भेदस्याव्याप्यवृत्तितया उपगन्तव्यतया उद्बुद्धसंस्कारे उद्बोधका-भावविशिष्टतद्भेदसत्त्वात् तादृशात् संस्कारात् विशिष्टवैशिष्ट्यस्मरण-निर्व्वाहः, संस्कारनिष्ठत्वविशेषितस्य उद्बोधकाभाववैशिष्ट्यस्यात्य-न्ताभाव एव वा निवेश्यः स च उद्बोधकासमवहितज्ञानादि-साधारणोऽपि, तथाच ज्ञानत्वस्य विशिष्टवैशिष्ट्यधीजनकतायाम-निवेशादेव तत्रातिव्याप्तिवारणसम्भवे किं व्याप्यविषयकत्वनिवे-

(१) कार्य्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशरीत्या चेत्यर्थः।

(२) ज्ञानोपरमेऽपीत्यादिरीत्या।

(३) कृतिसाक्षात्कारादौ व्यभिचारस्य दुर्व्वारत्वादित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शनेन, विशिष्टस्मरणातिव्याप्तेरनुभवत्वनिवेशेनापि वारणसम्भवादित्याशङ्क्य ज्ञानत्वेन विशिष्टवैशिष्ट्यबोधहेतुतायां व्यभिचारमुद्धरन् व्याप्यविषयकत्वनिवेशस्य तदतिव्याप्तिवारणप्रयोजनकत्वं दर्शयति, 'एतेनेत्यादिना, प्रथमतो विशिष्टवैशिष्ट्यस्मरणे व्यभिचारमुद्धरति, 'स्मृतिं प्रतीत्यादिना कल्पत्रयेण, 'संस्कारद्वारेति 'विशेषणधियो हेतुत्वस्य कल्पनादित्यनेनान्वयः, तथाच न स्मृतौ ज्ञानत्वावच्छिन्नस्य व्यभिचारः। विशेषणज्ञानजन्यसंस्कारोत्पत्तिक्षण एव विशिष्टानुभवस्योत्पत्त्या तत्र संस्कारद्वारा हेतुत्वासम्भवेऽपि न क्षतिः साक्षादेव तत्र तथात्वादित्याह, 'अनुभवं प्रति चेति। न च साक्षाद्धेतुत्वे स्मृतौ परम्परया हेतुत्वे चानुभवे व्यभिचारात् कथमयं कल्पः सम्भवदुक्तिक इति वाच्यम्। स्व-स्वव्यापारान्यतरत्वावच्छेदेन नियतपूर्व्ववर्त्तिताया एव कारणताघटकत्वात् प्रत्येकं व्यभिचारस्याकिञ्चित्करत्वात्। ननु व्यापारघटिता यस्य कारणता तदीयव्यापारमात्रसत्त्वं कार्य्योत्पत्तावपेक्षितं तथाच संस्कारादपि अनुभवसामग्रीसहकृताद्विशिष्टवैशिष्ट्यबोधापत्तिः, यदि च ज्ञानस्य स्वतःपूर्व्ववर्त्तिताया अपि कारणताघटकत्वात्तत्सत्त्वमप्यपेक्षितं तदा स्मरणेनापि तदपेक्ष्यतां अतो व्यापारघटितमेकं कारणत्वं अन्यच्च तदघटितं वाच्यं तथा च दर्शितव्यभिचारो दुर्व्वार एव इत्यनुशयेन कल्पान्तरमाह, 'निर्व्विकल्पकात्मकस्य वा स्मरणस्येति, विशिष्टस्मृतिपूर्व्वमित्यादिः, 'कल्पनादित्यनेनान्वयः।

केचित्तु विशेषणधिय इत्यग्रिमस्य विशेषणतावच्छेदकप्रकारकधिय इत्यर्थकतया विशेषणतावच्छेदकप्रकारकज्ञानस्यैव ज्ञान-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वेन हेतुतापरोऽयं ग्रन्थः, एवञ्च 'विशेषणविषयकादित्यादि-ग्रन्थोऽपि विशेषणविषयकपदस्य विशेषणतावच्छेदकप्रकारकार्थक-तया विशिष्टस्मरणपदस्य विशिष्टवैशिष्ट्यस्मरणपरतया विशेषण-तावच्छेदकप्रकारकज्ञानत्वेन हेतुतायामेव व्यभिचारप्रदर्शनपर-इति न सन्दर्भविरोधः (१)।

यद्यपि निर्व्विकल्पकस्मरणकल्पनया विशिष्टवैशिष्ट्यावगाहि-स्मरणस्य नोपपत्तिर्निर्व्विकल्पकस्य विशेषणतावच्छेदकप्रकारकत्व-विरहात् किन्तु विशिष्टवैशिष्ट्यस्मरणपूर्व्वं विशिष्टविशेषणस्मरण-कल्पनयैव तदुपपत्तिः इति निर्व्विकल्पकात्मकस्य वा इत्याद्य-ग्रिमग्रन्थविरोधः विशेषणतावच्छेदकप्रकारकस्मरणोपपादकतया तद्गोचरनिर्व्विकल्पकोपगमसङ्गतावपि अन्तरा विशिष्टविशेषण-स्मरणस्य कल्पनीयत्वाकथनेन न्यूनता दुरुद्धरैवेति, तथापि स्मृतेर्निर्व्विकल्पकतायाः सविवादतया तादृशी स्मृतिर्न सम्भवतीति विशिष्टवैशिष्ट्यस्मरणपूर्व्वं विशिष्टस्मृतिकल्पनं न सम्भवति विशिष्ट-वैशिष्ट्यधीहेतुतायामिव विशिष्टधीसामान्यहेतुतायामपि ज्ञानत्व-निवेशे युक्तेस्तुल्यत्वात् इत्युभयत्रैव ज्ञानत्वप्रवेश इत्यभिप्रायेणैव पूर्व्व-मतिव्याप्तिसमाधानं, एवञ्च इदानीं निर्व्विकल्पकस्मरणोपगमेनैव प्रत्यक्षस्थल इव निर्व्विकल्पकविशिष्टज्ञान-विशिष्टवैशिष्ट्यज्ञानानि स्मृतिस्थलेऽपि क्रमशो भवन्तीति विशिष्टवैशिष्ट्यबोधं प्रति ज्ञानत्वेन हेतुत्वे बाधकाभाव इत्यर्थतो लाभादन्तरा विशिष्टस्मृतिकल्पना-

(१) केचित्त्वित्यादिः न सन्दर्भविरोध इत्यन्तः पाठः बहुषु आदर्शपुस्तकेषु नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कथनेपि न न्यूनतेति ध्येयम् । अथातिप्रसङ्गवारणाय समानप्रकारकत्वेनैव स्मृतिं प्रति संस्कार-ज्ञानयोर्हेतुत्वान्न निर्व्विकल्पकस्मरणसम्भवः घटत्वादिविशिष्टतद्घटागोचरसंस्कारादिजन्यतायां निर्व्विकल्पकसाधारणस्य घटत्वादिभिन्नप्रकारतानिरूपितविशेष्यताभिन्न-तद्घटादिविषयताशालिघटत्वादिगोचरस्मृतित्वस्यावच्छेदकत्वे च यत्र द्रव्यत्वेन तद्घटावगाहिनो घटत्वेन चैतद्घटावगाहिनः संस्काराद्घटत्व-तद्घटादिविषयकं निर्व्विकल्पकं (१) तत्र घटत्वविशिष्टतद्घटविषयकसंस्कारादेर्व्यभिचारः,(२) एवं निर्व्विकल्पकस्मरणोपगमे प्रमेयत्वादिसामान्यलक्षणाजन्यज्ञानाधीनविश्वविषयकनिर्व्विकल्पकस्मरणात् स्वरूपतो निखिलजातिप्रकारकं ज्ञानं स्यात् । न च तादृशं ज्ञानमसर्व्वज्ञस्यानुभवसिद्धं, न च स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकसंस्कारादेर्हेतुतया तादृशकारणाभावात् सकलजातिनिर्व्विकल्पकसत्त्वेऽपि न स्वरूपतः सकलजातिप्रकारकस्मरणसम्भवः तादृशप्रत्यक्षादेरपि युगपत् सकलजातिसन्निकर्षविरहेण नापत्तिसम्भव इति वाच्यम् । ज्ञानरूपसन्निकर्षसत्त्वेन तादृशमानसस्य दुर्व्वारत्वात् तत्कथमिदानीमपि निर्व्विकल्पकस्मरणमङ्गीकृतमिति चेन्न, अनुद्बुद्धसंस्कारान्यत्वापेक्षया लघुना ज्ञानत्वेन विशिष्टधीहेतुतासिद्धौ तन्निर्व्वाहकतया निर्व्विकल्पक-

---

(१) तादृशस्मृतेस्तद्घटावगाहित्वसम्पत्त्यर्थं द्रव्यत्वेन तद्घटावगाहीति, घटत्वावगाहित्वार्थं घटत्वेनैतद्घटावगाहीत्युक्तम् ।

(२) तादृशस्मृतेर्घटत्वप्रकारकतद्घटविशेष्यकसंस्कारस्य कार्य्यतावच्छेदकाक्रान्तत्वात् तत्पूर्व्वं तदभावाद्व्यभिचार इत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मरणस्यावश्यकत्वे तत्तद्विषयकस्मृतौ (१) तत्तद्विषयकसंस्कारत्वादिना सामान्यतो हेतुत्वान्तरस्य च कल्पनीयतया विशिष्टसंस्कारादितो विशिष्टस्मरणस्येव तत्पूर्व्वं निर्व्विकल्पकस्यापि स्मरणस्य सम्भवः, न चोक्तक्रमेण सार्व्वज्ञ्यापत्तिः, स्वरूपतस्तत्प्रकारक उपनीतभाने स्वरूपतस्तत्प्रकारकज्ञानस्य हेतुत्वोपगमात्, उद्बोधकाकल्पनेन वा प्रमेयत्वादिसामान्यलक्षणाप्रयोज्ययावत्प्रमेयगोचरसंस्काराद्यावज्जातिनिर्व्विकल्पकस्यापि वारणसंभवात्। तदनभ्युपगमेऽपि (२) स्वरूपतो भानयोग्यप्रमात्वघटकपदार्थनिर्व्विकल्पकमूलकप्रमेयत्वादिविषयकस्मरणजन्यतत्प्रकारक-विश्वविशेष्यकस्मरणादेव (३) कालादौ प्रमेयत्वादिना सकलप्रमेयप्रकारकस्मरणोपपत्तिरित्याशयेनेदानीं निर्व्विकल्पकस्मरणोपगमात्। ननु विशिष्टज्ञानत्वं परित्यज्य विशिष्टानुभवत्वस्य जन्यतावच्छेदकत्वोपगमेनैव विशिष्टस्मृतौ व्यभिचारवारणे किं निर्व्विकल्पकस्मरणादिकल्पनया। न च विशिष्टविषयकानुभवत्वापेक्षया लघुरूपविशिष्टविषयकत्वमेव स्मृतिसाधारणं विशेषणधीजन्यतावच्छेदकं तथाच निर्व्विकल्पकस्मरण-

---

(१) पूर्व्वोक्तव्यभिचारमुद्धरति तत्तदित्यादिना तथाच तद्विषयकसंस्कारस्य तत्र सत्त्वान्न व्यभिचार इति भावः।

(२) ननु प्रमेयत्वसामान्यलक्षणाजन्यज्ञानाधीनविश्वविषयकसंस्कारात् निखिलजातिनिर्व्विकल्पकानभ्युपगमे कालः प्रमेयवानित्यादिविश्वविषयकस्मरणानुपपत्तिरित्यत आह, 'तदनभ्युपगमेपीति यावज्जातिनिर्व्विकल्पकानभ्युपगमेपीत्यर्थः।

(३) प्रमेयत्वादिप्रकारकस्मरणजन्यतत्प्रकारकविश्वविशेष्यकस्मरणादेवेति पुस्तकान्तरपाठः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मावश्यकमेवेति वाच्यम्। ज्ञानविनाशेऽपि तद्व्यापारभूतया इच्छया विशिष्टविषयककृतिजननात्तत्र व्यभिचारेण विशिष्टविषयकत्वमात्रस्य विशेषणधीजन्यतावच्छेदकत्वासम्भवात्। न चोपादानप्रत्यक्षस्य साक्षात् कृतिं प्रति हेतुतया कृतौ न ज्ञानत्वावच्छिन्नस्य व्यभिचार इति वाच्यम्। उपादानप्रत्यक्षस्य फलविषयकत्वानियमात् सुखत्वादिविशिष्टफलविषयककृतौ सुखत्वादिधियो व्यभिचारस्य दुर्व्वारत्वात्। एवं निर्व्विकल्पकस्मरणोपगमेऽपि कृतिसाक्षात्कारपूर्व्वं विशिष्टस्मृतिकल्पनया न तदुपपत्तिः कृतिद्वितीयक्षणोत्पन्ननिर्व्विकल्पकस्मरणेन विशिष्टविषयस्मृतिजननकाले कृतिनाशेन विशिष्टविषयोपधानेन कृतिसाक्षात्कारासम्भवादित्यालोच्य विशिष्टानुभवत्वस्यैव विशेषणधीजन्यतावच्छेदकत्वमाह, 'अनुभवमिति, 'तस्याः' विशेषणधियः, अनुभवत्वजात्यनङ्गीकारे विशिष्टप्रत्यक्षत्वस्यैव तथात्वं स्वीकरणीयमिति ध्येयम् (१)। इच्छा-द्वेषसाक्षात्कारे व्यभिचारस्य कथितरीत्या (२) अनवकाशात् कृतिसाक्षात्कारे व्यभिचारमुद्धरति, 'नियमत इति यत्र यत्र कृतिसाक्षात्कारस्तत्र कृतिद्वितीयक्षणे विशिष्टविषयस्मृतिं कल्पयित्वा तदनन्तरक्षण एव कृतिप्रत्यक्षोपगमादित्यर्थः। न च कृतित्वनिर्व्विकल्पक-विषय-

---

(१) अनुमिति-शाब्दौ प्रति परामर्श-योग्यताज्ञानादीनां नियामकत्वात् विशिष्टप्रत्यक्षत्वमेव तस्य कार्य्यतावच्छेदकमित्याशयः।

(२) विनश्यदवस्थज्ञानमूलकनरसिंहाकारेच्छानिर्व्विकल्पकज्ञानसम्भवेन न व्यभिचार इत्युक्तरीत्येत्यर्थः। अथवा ज्ञानस्य इच्छा-द्वेषौ प्रति कार्य्यकालवृत्तितया कारणत्वोक्त्येत्यर्थः। पूर्व्वग्रन्थस्य एतादृशार्थे तात्पर्य्यात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मरणयोर्युगपदुत्पादासम्भवात्, क्रमेण तदुभयोत्पत्तौ कृतेर्व्विनाशा-द्विषयविरहेण कृतित्वविशिष्टकृतिप्रत्यक्षानुपपत्तिरिति वाच्यम्। कृतित्वादिविशिष्टबुद्धौ तज्ज्ञानस्य हेतुत्वानुपगमेन तन्निर्व्विकल्प-कस्यानभ्युपगमात्। तत्र विशेषणधियो हेतुत्वेऽपि विषयस्मरणस्यैव कृतित्वविषयकत्वोपगमेनोपपत्तौ तन्निर्विकल्पकस्यानावश्यक-त्वात्। अनादौ संसारे सर्व्वदैव कृतित्वविषयकसंस्कारसम्भवेन कृतिसाक्षात्कारजनकविषयस्मृतौ तज्ज्ञाने बाधकाभावात्। न चैवमन्यत्रापि निर्व्विकल्पकोच्छेदः, अपूर्व्वचैत्रत्वादेः प्राथमिक-विशिष्टबुद्धिपूर्व्वं तत्स्मरणासम्भवेन तन्निर्व्विकल्पकस्यावश्यक-त्वात्। यत्र विशिष्टान्तरचाक्षुषादिसामग्रीकाले घटादीन्द्रिय-संयोगोत्पत्तिस्तत्र द्वितीयक्षणे विशिष्टान्तरचाक्षुषाद्युत्पत्त्या घट-त्वादिस्मरणासम्भवेन तदुत्तरं घटत्वादिविशिष्टधीनिर्व्वाहाय घट-त्वादिनिर्व्विकल्पकस्यावश्यकत्वाच्च।

अनुमानदीधितिः।

साध्यादेरननुगमात् एकोपादाने अन्यानुमितौ दैवाद्व्याप्तिविषयिण्याञ्च तस्यामव्याप्तिः परमवशिष्यते, सापि तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया निरसनीया, एतल्लाभायैव चानुभवार्थकं चरमज्ञान-पदम्। एवञ्चान्वय-व्यतिरेकव्याप्त्योः पृथक्प्रयोजकत्वे-ऽपि न क्षतिः। पर्व्वत-वह्निव्याप्यवैशिष्ट्यावगाहिनिश्चय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वावच्छिन्नकारणताप्रतियोगिककार्य्यताया वह्निव्याप्यवत्पर्व्वतनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकव्याप्यविषयकवृत्तिकार्य्यताया वा अवच्छेदिका ज्ञानवृत्तिः सामानाधिकरण्येन वावच्छेदिका या जातिस्तद्वत्त्वं वा बोध्यम् ।

गादाधरी विवृतिः ।

जन्यज्ञाने व्याप्यविषयकत्वनिवेशे यत्र व्याप्तिविशिष्टधूमादेः पक्षतावच्छेदकघटकता तत्रत्यानुमितौ वह्नि-तद्व्याप्यधूमादिविषयकसमूहालम्बनानुमितौ चाव्याप्तिं (१) साध्याद्यननुगमनिबन्धन-व्याप्त्यननुगमप्रयुक्ताव्याप्तिवारणानुरोधेनावश्यविवक्षणीयवह्निव्याप्तिविशिष्टपर्व्वतवृत्तिताज्ञानजन्यव्याप्यविषयकज्ञानजातीयत्वस्य लक्षणतया निराकर्त्तुमाह, 'साध्यादेरिति, 'आदिना सम्बन्धविशेषादिपरिग्रहः । 'एकोपादाने' एकसाध्यादिघटितव्याप्यादिविषयकपरामर्शजन्यताघटितलक्षणे, 'अन्यानुमितौ' अन्यसाध्यकाद्यनुमितौ, 'दैवात्' दैववशसम्पन्नसामग्रीविशेषात्, 'तस्यां' अनुमितौ, 'परमित्यनेन अतिव्याप्तेरसम्भवस्य च व्यवच्छेदः, 'तादृशज्ञानवृत्तीति पर्व्वत-वह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नजन्ये व्याप्यविषयके वह्निव्याप्यधूमविशिष्टपर्व्वतत्वावच्छिन्नविषयक-

---

(१) अव्याप्तिमित्यस्य निराकर्त्तुमित्यग्रिमेन सहान्वयः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निश्चयत्वावच्छिन्नजन्ये वा ज्ञाने समवेतेत्यर्थः, तद्वृत्तित्वं तत्समवेतत्वं, अतो न सम्बन्धान्तरेण तद्वृत्तिप्रत्यक्षत्वादिकमादाय ज्ञानमात्रेऽतिव्याप्तिः (१)। सत्ता-गुणत्व-ज्ञानत्वानुभवत्वजातीरादायातिव्याप्तिवारणायानुभवत्वव्याप्येति, व्याप्यत्वमिह भेदगर्भं, अनुभवत्वान्यत्वे सति अनुभवान्यासमवेतत्वरूपं विवक्षितं तेनानुभवत्वनिरासः। यद्यपि अनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वरूपं यत्किञ्चिदनुभवासमवेतत्वरूपं वा तदव्यापकत्वं निवेश्यापि अनुभवत्वान्तजातीनां वारणं सम्भवति, तथापि ईदृशव्यापकजातिवारकप्रकाराणां जातिघटितान्यलक्षणे बहुशो ग्रन्थान्तरे च दर्शितत्वात् दिक्प्रदर्शनायैव एकप्रकारोऽत्र दर्शितः, व्याप्यपदमेव उक्तभेदगर्भव्याप्त्यपेक्षया लघुशरीरदर्शिताव्यापकत्वार्थकमिति तु न युक्तं, यां काञ्चिदित्यादौ दर्शितभेदगर्भव्याप्तेः व्याप्यपदार्थस्य स्फुटतयोपादानेन विरोधादिति। जातिपदं समायेन तद्वत्तालाभाय, जातिभिन्नज्ञानसमवेतधर्म्माप्रसिद्ध्या जातित्वनिवेशवैयर्थ्यात्। यद्यपि तादृशधर्म्मोऽनुमितित्वं तदेव च लक्ष्यतावच्छेदकं (२) तथापि स्वरूपतस्तस्य लक्ष्यतावच्छेदकता दर्शितरूपेण च लक्षणत्वमित्यविरोधः। ननु व्याप्यविषयकत्वस्य जन्यज्ञानविशेषणत्वे संस्कारवारणाय उपात्तं ज्ञानपदमनर्थकं व्याप्यवत्तानिश्चय-

---

(१) प्रत्यक्षत्वादेस्तज्जन्यज्ञानासमवेतत्वादिति भावः।

(२) तथाच लक्षण-लक्ष्यतावच्छेदकयोरभेद इति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वावच्छिन्नजन्यसंस्कारस्य व्याप्तिविषयकत्वनियमात् इत्याशङ्क्य तत्पदमुक्तार्थलाभसम्पादकतया सार्थकयति, 'एतल्लाभायैव चेति जन्यपदस्य लक्षणयाऽनुभवत्वव्याप्यजातिपुरस्कारेण जन्यजातीयत्वार्थे तात्पर्य्यग्रहायैवेत्यर्थः। अनुभवत्वोपस्थापकज्ञानपदसमभिव्याहारादनुभवत्वघटितोक्तार्थे झटिति तत्तात्पर्य्यग्रहात् घटो पटजातीयं द्रव्यमितिवत् जलं घटजातीयं द्रव्यमित्यादिवाक्यस्य स्वरसतोऽप्रयोगात्तज्जातीयार्थकपदस्य समभिव्याहृतपदोपस्थाप्यधर्म्मव्याप्यजात्या साजात्यपरतायाः औत्सर्गिकत्वादितिभावः। जातिघटनायाः प्रयोजनान्तरमपि दर्शयति, 'एवञ्चेति, 'पृथक्प्रयोजकत्वेऽपि' अनुमितिनिरूपितविभिन्नकारणतावच्छेदकशरीरे विशेषरूपेण प्रवेशेऽपि, 'न क्षतिः' न एकतरव्याप्तिघटितलक्षणकरणेऽपरव्याप्तिज्ञानजन्यानुमितावव्याप्तिः, एकतरव्याप्तिज्ञानजन्यजातीयत्वस्यापरव्याप्तिज्ञानजन्यानुमितावक्षतत्वादिति भावः। कार्य्यतासामानाधिकरण्यस्थले कार्य्यतावच्छेदकत्वनिवेशने जातावनुभवत्वव्याप्यत्वविशेषणं विनैव सत्तादिवारणं सम्भवति तादृशजातीनां परामर्शजन्यतावच्छेदककोट्यनिविष्टत्वात् अनुमितित्वस्यैव तथात्वादित्याशयेनाह, 'पर्व्वतेति, व्याप्य-पक्षविशेष्यकपरामर्शयोरनुगतरूपेण हेतुतामते तद्रूपावच्छिन्नाजन्यतयैव ज्ञानान्तरातिव्याप्त्यनवकाशात् तादृशकारणताघटितप्रथमकल्पे व्याप्त्यविषयकत्वानिवेशः। अवच्छेदकत्वस्य पर्य्याप्त्यनिवेशाद्विशेषविषयकत्वस्याधिकस्य च परामर्शजन्यतावच्छेदकत्वेऽपि नासम्भवः। समुदायस्य एकदेशानतिरिक्ततया समुदायस्यावच्छेदकत्वे तदेकदेशस्यापि तथात्वस्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याहतत्वात्। अतएव (१) अवच्छेदककोटिप्रविष्टवह्नित्वादिजातिमादाय वह्न्यादिरूपविषयेऽतिव्याप्तिवारणाय 'ज्ञानवृत्तिरिति ज्ञानसमवेतेत्यर्थः। अथ वह्नित्वादिकमवच्छेदकविशेषणतयावच्छेदकतायामेवावच्छेदकं न तु कार्य्यतायां तथाच कथं तज्जातिमादायातिव्याप्तिप्रसक्तिः। न च स्वावच्छिन्नविधेयताकत्वसम्बन्धेन कार्य्यविशेषणतया वह्नित्वमपि कार्य्यतावच्छेदकमिति वाच्यम्। तादृशपरम्परायाः सम्बन्धत्वे मानाभावात् विषयितासम्बन्धेन च वह्नित्वस्यातिप्रसक्ततया अवच्छेदकत्वायोगादिति चेन्न, अवच्छेद्याश्रये साक्षात् परम्परया वा यावन्ति विशेषणानि तावत्स्वेव कार्य्यतावच्छेदकत्वोपगमे बाधकाभावात्कार्य्यतावच्छेदकादिविशेषणस्य कार्य्यतादौ तदवच्छेदकत्वे वा अवच्छेदकत्वमित्यत्र विनिगमकाभावेऽपि न ज्ञानवृत्तीत्यादिवैयर्थ्यम्। न च व्यधिकरणस्यानवच्छेदकत्वनियमात् विषयवृत्तेर्न कार्य्यतावच्छेदकत्वसम्भव इति वाच्यम्। साक्षादवच्छेद्याश्रयविशेषणतया विलक्षणावच्छेदकतायामेव सामानाधिकरण्यापेक्षणात्। अवच्छेदकघटकानां भेदेऽपि अवच्छेद्यज्ञाननिरूपिताया अवच्छेदकतापर्य्याप्त्यधिकरणं यादृशं तादृशप्रकारावच्छेद्याश्रयज्ञाननिष्ठविषयताया अभेदादवच्छेद्यकार्य्यतादेरभेद इति वह्निविधेयकानुमितिः परामर्शजन्या इत्याकारके कार्य्य-कारणभावग्रहे अनुमितिविषयताया ऐक्यात् कार्य्यकारणभावैक्यं, अनुमितित्व-वह्नित्वादीनामवच्छेदकतावैलक्षण्येन

---

(१) अवच्छेदकत्वपर्य्याप्तनिवेशादेव।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

•Markandeya Purana, Fasc. 5-7 @ /10/ each ...	Rs. 1	14
*Mīmāṁsā Darçana, Fasc. 10-19 @ /10/ each	6	4
Nyāyavārtika, Fasc. 1--6 @ /10/ each	3	12
*Nirukta, Vol. IV. fasc. 1-8 @ /10/ each	5	0
*Nitisara, Fasc. 3-5 @ /10/ each	1	14
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each	4	6
Nityācārapradīpaḥ Vol. I. Fasc. 1--8 ; Vol. II, Fasc. 1-3. @ /10/ each ...	6	14
Nyayabinduṭīkā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--3 @ /10/ each	5	0
Nyayasarah	2	0
Padumawati, Fasc. 1--5 @ 2/	10	0
*Pariçiṣta Parvan, Fasc. 3--5 @ /10/ each	1	14
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
Prithivirāj Rāsa. Part II, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/-	1	0
Prākrta Lakṣaṇam Fasc. 1 @ 1/8/ each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-3	3	12
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
Samaraieca Kaha Fasc. 1-3, @ /10/	1	14
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
•Sankara Vijaya, Fasc. 2-3 @ /10/ each	1	4
Six Buddhist Nyaya Tracts.	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Sragdharā Stotra (Sanskrit and Tibetan)	2	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta fasc. 1	1	4
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each	9	6
„ Pratisakhya, Fasc. 1-3 @ /10/ each	1	4
•Taitterīya Saṁhitā, Fasc. 27-45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10-19 @ /10/ each	6	14
Tantra Vārteka (English) Fasc. 1-8 @ 1/4/ each	10	0
Tattva Cintāmaṇi, Vol. I, Fasc. 1-9, Vol II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV. Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	24	6
Tattva Cintamani Didhiti Vivriti, Fasc, 1, @ /10/ each	0	0
Ditto Prakas, fasc. 1-2, @ /10/ each	1	4
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Tirthacintamoni, fasc, 1, @ /10/ each	0	10
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
•Vāyu Purāṇa, Vol. I, Fasc. 3--6 ; Vol. II, Fasc. 1--7, @ /10/ each ...	6	14
Vidhāna Pārijata, Fasc. 1-8 Vol- II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-4 @ 1/4/	3	12
Vivādaratnākara, Fasc. 1--7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each	1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1-3	3	12

Tibetan Series.

Baudhyastotrasangraha, Vol. I (Tib. & Sans.)	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/- each	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Ṭiñ, Fasc. 1--4 @ 1/- each	4	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans. Avadāña Kalpalatā) Vol. I, Fasc. 1--8 ; Vol. II. Fasc. 1--7 @ 1/- each	15	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6, @ 1/ each	14	0

Arabic and Persian Series.

*Ālamgirnāmah, with Index, (Text) Fasc. 1--13 @ /10/ each	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1--4 @ 1/- each	4	0
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each...	55	8

*The other Fasciculi of these works are out of stock and complete copies cannot be supplied.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Āin-l-Akbari, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, ...	36	0
Ditto (English) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-7 Vol 3 @ 1/4/ each	20	0
Arabic Bibliography, by Dr. A. Sprenger, @ /10/ ...	0	10
*Bādshāhnāmah, with Index, Fasc. 1--19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each ... Rs.	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each ...	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farnang-i-Rashīdī, Fasc. 1--14 @ 1/8/ each	21	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each	4	0
Futūḥ-ush-Shām of Wāqidī, Fasc. 1--9 @ /10/ each	5	10
Ditto of Āzādī, Fasc. 1--4 @ /10/ each	2	8
History of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each	0	12
Hisātory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each	7	8
Iqālnamah-i-Jahāngīrī, Fasc. 1--3 @ /10/ each	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-Ālamgīrī, Fasc. 1--6 @ /10/ each	3	12
Maa'āṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Maghāzi of Wāqidī, Fasc. 1--5 @ /10/ each	3	2
Marhamu 'L-Ilali 'L-Mu'Dila	1	0
Muntakhabu-t-Tawārikh, Fasc. 1--15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc. 1 @ 1/ each ...	16	0
Muntakhabu-l-Lubāb, Fasc. 1--19 @ /10/ each	11	14
Ditto Part 3, Fasc. 1	1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Niẓāmī's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott	5	0
Riyāẓu-s-Salāṭīn, Fasc. 1--5 @ /10/ each ...	3	2
Ditto (English) Fasc. 1--5 @ 1/	5	0
Tadhkira-i-khushnavīsān	1	0
Tabaquāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni Fasc. 1--7 @ /10/ each	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1--6 @ /10/ each	3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each ...	3	0
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1 @ 1/	1	0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /10/ each ...	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each ... 20 0
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. JOURNAL of the Assiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

   N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.
4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each ... 18 0
9. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ ... 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each ... 34 0

Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer, Asiatic Society," only.

Books are supplied by V. P. P. 28-3-11.